9.3

सरल संस्कृत निबन्ध-माला

...यालय
...राणसी-५
...3/95

डा० रमा वेंकटरामन्

डा 3/95

आम्नाय–ग्रन्थालय,
भरतनिधि, रांची
वाराणसी-5

सरल संस्कृत निबन्ध-माला

आम्नाय–ग्रन्थालय,
भरतनिधि, करौंदी
वाराणसी-5

डॉ. रमा वेंकटरामन्

Published by :
Sri S. Somaskandan
N 4/18 A क
KARAUNDI
Varanasi-221005

आम्नाय-ग्रन्थालय
वाराणसी-5

Copies can be had from :
Dr. (Mrs.) Rama Venkataraman
19, C. V. Raman Road
Alwarpet
Madras-600018

Price : Rs. 20/-

Printed at :
Ratna Printing Works
Kamachha, Varanasi.

आम्नाय-ग्रन्थालय,

Preface

While teaching Samskrit in a reputed school in Mâdras I noticed that the students had lot of difficulties in getting suitable general books for essay writing. My students also urged me to write some essays in easy Samskrit keeping in view their standard in the language. Their continuous persuasion prompted me to write some essays on important topics which are generally asked in the examination for the Higher Secondary classes. I have taken sufficient care to see that the language used is simple enough that could be understood by an average student of Higher Secondary classes.

My thanks should first go to my students who were instrumental in my undertaking this work. But the main credit goes to my husband Sri. P. Venkataraman who gave me full support and cooperation and encouraged me to complete this work and make it available to the needy students as early as possible. Words are not adequate to express my sense of gratitude to him. My son, Dr. V. Aravind and my daughter, Dr. V. Shambhavi literally goaded me and relieved me from other responsibilities so as to enable me to write these essays. My blessings to them.

My thanks are due to Dr. A. K. Srivastava, Senior Lecturer in Samskrit, B. H. U., who was kind enough to go through the manuscript. My parents gave me all

help and assistance in getting this book printed in Varanasi and I am grateful to them for this purpose. Thanks are not enough for my younger brother Dr, S. Vijaya Kumar, Reader in Philosophy, B. H. U. who provided help in correcting the proof. And lastly I express my sincere thanks to the proprietors of Ratna Printing Works of Varanasi for printing this book in a very short time and in a very fine manner for which they are well known.

I offer this book to Lord Guruvayurappa with the prayer :

"त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पये"

Varanasi **Rama Venkataraman**
Dipavali,
November 13, 1993

आम्नाय-ग्रन्थालय,
भरतमिलाप, कर्रोही
वाराणसी-5

विषय-सूची

		पृष्ठांका:
	भूमिका	7
1.	संस्कृत भाषाया: गौरवम्	9
2.	विद्याया: माहात्म्यम्	11
3.	अस्माकं विद्यालय:	13
4.	विद्यालयस्य वार्षिकोत्सव:	15
5.	पुस्तकालय:	17
6.	मम प्रियँ पुस्तकम्	19
7.	श्रीमद्भगवद्गीता	21
8.	महाकवि: कालिदास:	23
9.	महाकवि: वाल्मीकि:	24
10.	सत्संगति:	27
11.	अनुशासनम्	29
12.	परोपकार:	31
13.	सदाचार:	33
14.	मम प्रिय: शिक्षक:	35
15.	आदर्श: छात्र:	37
16.	समयस्य सदुपयोग:	38
17.	समाचारपत्रम्	40
18.	मम प्रिया क्रीड़ा	42
19.	रुचिकरा क्रीड़ा	43
20.	अस्माकं देश:	45

21.	हिमालयः	47
22.	जननी जन्मभूमिश्च स्वर्गादपि गरीयसी	50
23.	वाराणसी-क्षेत्रम्	52
24.	अस्माकं नगरम्	54
25.	स्वतन्त्रतादिवस-समारोहः	56
26.	गणतन्त्रदिवस-समारोहः	57
27.	वसन्तर्तुः	59
28.	वर्षर्तुः	61
29.	ग्रीष्मर्तुः	63
30.	दीपावली	64
31.	होलिकोत्सवः	66
32.	विजयदशमी	68
33.	कोऽपि महापुरुषः	70
34.	महामना मदनमोहन मालवीयः	72
35.	श्री लोकमान्यः तिलकः	74
36.	स्मरणीयं भ्रमणम्	76
37.	दूरदर्शनस्य लाभाः	77
38.	विज्ञानस्य चमत्काराः	79
39.	रूप्यकस्य आत्मकथा	81
40.	मम महत्त्वाकांक्षा	82
41.	कृषकः	84

भूमिका

निबन्ध किसे कहते हैं ? निबन्ध का अर्थ है 'गद्य में लिखा गया स्वतन्त्र लेख'। किसी भी विषय पर अपने विचारों को अभिव्यक्त कर लेख लिखने को निबन्ध कहते हैं।

संस्कृत में निबन्ध लिखना कोई कठिन विषय नहीं है। जैसे अन्य भाषाओं में निबन्ध लिखते हैं, वैसे ही संस्कृत में भी लिखा जाता है। यदि संस्कृत में निबन्ध लिखने में असमर्थ हों तो हिन्दी या अंग्रेजी में निबन्ध लिख कर, संस्कृत में उसका अनुवाद कर लेना चाहिए।

संस्कृत में निबन्ध लिखते समय निम्नलिखित विषयों का ध्यान रखना चाहिए।

1. किसी भी विषय पर निबन्ध लिखते समय, भूमिका, विषय, लाभ, महत्त्व, उदाहरण और उपसंहार आदि प्रस्तुत करना चाहिए।

2. जहाँ तक हो सके छोटे-छोटे वाक्यों का ही प्रयोग करना चाहिए। जो अनेकों बार नहीं रखा

3. वाक्यों में विभक्ति और क्रिया का ध्यान रखना चाहिए। गया।

4. प्रथमपुरुष, मध्यमपुरुष और उत्तमपुरुष के प्रयोग के समय वचनानुसार क्रिया का भी ध्यान सें प्रयोग करना चाहिए।

5. लकारों का सही उपयोग करना चाहिए।

6. सकर्मक, अकर्मक प्रयोग भी ध्यान से करना चाहिए।

7. आत्मनेपद, परस्मैपद धातुओं का भी ध्यान रखना चाहिए।

8. शब्दों के प्रयोग के समय वचनों का ध्यान रखना आवश्यक है।

बहुधा नहीं रखा गया।

9. सभी विभक्तियों और उपपद विभक्तियों के प्रयोगों का भी ध्यान रखना आवश्यक है।

10. सन्धि तथा समासों का प्रयोग भी ध्यान से करना चाहिए।

11. यदि किसी शब्द के लिंग अथवा शुद्ध रूप के विषय में संदेह है तो उसका उपयोग नहीं करना चाहिए।

इन विषयों को ध्यान में रखते हुए सभी लोग सरलता से निबन्ध लिख सकते हैं। इस पुस्तक में विद्यार्थियों की सुविधा के लिये कुछ प्रमुख विषयों पर, सरल संस्कृत में, निबन्ध प्रस्तुत हैं। विद्यार्थियों को चाहिए कि वे आत्मविश्वास के साथ स्वतन्त्र रूप से अन्य विषयों पर भी निबन्ध लिखने का प्रयत्न करें।

वाराणसी-5

आम्नाय-ग्रन्थालय,
... वाराणसी-5

संस्कृतभाषायाः गौरवम्

संस्कृतभाषायाः महत्त्वम्

"भाषासु रम्या मधुरा दिव्या गीर्वाणभारती"

संस्कृतभाषा संसारस्य प्राचीनतमासु भाषासु एका भाषा अस्ति । एतां भाषां देवभाषा, देववाणी, सुरवाणी, गीर्वाण-वाणी इत्यादि शब्दैः अपि वयं सर्वे व्यवहरामः । संस्कृतं पुरा भारतीयानां लोकप्रिया जनभाषा आसीत् । भारतीयानां भाषाणां तु संस्कृतभाषा जन्मदात्री एव ।

"सम्यक्रूपेण कृतम् इति संस्कृतम्"

संस्कृतम् अस्य शब्दस्य अर्थः परिष्कृतम्, शुद्धम्, सम्यक्-प्रकारेण रचितम् च । एवं संस्कृतभाषा शुद्धा, परिष्कृता, सम्यक् च कृता सिध्यति ।

संस्कृतभाषा अलौकिकैः गुणैः समृद्धाः अस्ति । अस्याः शब्दकोषः सुविशालः अस्ति । एकस्य पदार्थस्य अनेके वाचकाः अत्र उपलभ्यन्ते । विविधक्रियाणाम् अभिव्यक्तिहेतोः अनेकाः धातवः सन्ति । इयं सुविचारितैः व्याकरणनियमैः अनुशासिता वाक् कलायाः मूर्तं रूपं धारयति । इयं भाषा स्वल्पैः शब्दैः महदर्थप्रकटने समर्था अस्ति ।

अस्यां भाषायाम् अनेके धर्मग्रन्थाः लिखिताः सन्ति। वेदाः, उपनिषदः, रामायणं, महाभारतं इत्यादयः अस्यां भाषायां

विराम या अर्धविराम के पूर्व • नहीं रह सकता है।

एव लिखिताः सन्ति । महाकाव्येषु कालिदासस्य रघुवंशः, भारवेः किरातार्जुनीयम्, श्री हर्षस्य नैषधीयचरितम्, इत्यादयो ग्रन्थाः सर्वस्मिन् संसारे प्रख्याताः सन्ति ।

विविधानां भारतीयभाषाणां साहित्यस्य मूलस्रोतः संस्कृत-साहित्यमेव । लोके बाल-साहित्यस्य उद्‌गमः अपि संस्कृतस्य पंचतन्त्रे, हितोपदेशे च विद्यते ।

संस्कृतभाषायाः अध्ययनं विना भारतीय संस्कृतेः ज्ञानम् असम्भवम् । संस्कृतभाषायाः ज्ञानं विना वयं संस्कृतस्य विशालं साहित्यं पठितुं च न समर्थाः ।

न केवलं भारतीयासु अपितु यूरोपीयभाषासु अपि संस्कृतभाषायाः एव बहवः शब्दाः रूपान्तरं प्राप्ताः । एवं संस्कृतभाषायाः महत्त्वं न केवलं भारते एव विद्यते, अपितु सर्वस्मिन् संसारे एव ।

श्रीनेहरूः अकथयत् -"संस्कृतं भव्यमुदात्तं च अस्माकं पितृधनम्, यावच्च इदं तिष्ठेत्, जनजीवनं च प्रभावयेत्, तावदेव हि भारतस्य भारतत्वम्" ।

विद्यायाः माहात्म्यम्

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं,
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने, विद्या परं दैवतं,
विद्या राजसु पूज्यते, न हि धनं, विद्या-विहीनः पशुः ॥

ज्ञानार्थकात् 'विद्' धातोः विद्या शब्दस्य व्युत्पत्तिः । कस्यचिदपि पदार्थस्य सम्यक् ज्ञानं विद्येति कथ्यते । एतत् सर्वथा सत्यम् अस्ति यत् विद्याधनं सर्वधनप्रधानम् । सर्वेषां देशानां साहित्येषु भाषासु वा विद्यायाः महिमा पुनः पुनः गीयते ।

संसारे बहूनि धनानि सन्ति परं तेषु विद्याधनं सर्वश्रेष्ठमस्ति । यतः धनं खलु चौराः चोरयन्ति, दायादाः विभजन्ते, शासकाः हरन्ति । अनेन प्रकारेण धनसम्बन्धे पदे-पदे भीतयः सन्ति । परन्तु विद्याधने किमपि भयं नास्ति । विद्याधनं ईदृशं धनम् अस्ति यत् चौराः चोरयितुं न शक्नुवन्ति, राजा च बलाद् गृहीतुं न शक्नोति । संततं दानेन वर्धते । कथितं च :—

न चौरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि।
व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम् ॥

अन्यानि धनानि व्यये क्रियमाणे क्रमशः क्षीणानि भवन्ति । परन्तु विद्याधनं यथा-यथा व्ययो क्रियते तथा-तथा प्रतिदिनं

परिवर्द्धत एव । अर्थात् विद्याधनम् अध्ययनेन अध्यापनेन च निरन्तरं वृद्धिं प्राप्नोति । यथा चोक्तम् :–

अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति
व्ययतो वृद्धिमायाति क्षयमायाति संच्चयात् ।

विद्या एव तद् वस्तु अस्ति, यद् मानवं पशुभ्यः भिन्नं सम्पादयति । जायमानः शिशुः पशुतुल्यः एव भवति । परं जीवने शनैः शनैः विद्यायाः अध्ययनं कृत्वा सः मानवः भवति । विद्याविहीनः तु पुच्छविषाणहीनः पशुः भवति । यथा भर्तृहरिणा उक्तम् :–

साहित्य-संगीत-कलाविहीनः
साक्षात् पशुः पुच्छविषाणहीनः ।
तृणं न खादन्नपि जीवमानः
तद्भागधेयं परमं पशूनाम् ॥

जीवनस्य उन्नत्यै विद्यायाः अध्ययनं परमावश्यकं विद्यते। विद्यया वयं स्वकीयं कर्तव्यं जानीमः । धर्माधर्मयोः पाप-पुण्ययोः चापि ज्ञानं विद्ययैव भवति । विद्यायाः मनुष्यः विनयमाप्नोति । विनयात् पात्रतां लभते, पात्रत्वात् धनं प्राप्नोति, धनात् धर्मः, धर्मात् च सुखं लभते । उक्तं चः–

विद्या ददाति विनयम्, विनयाद् याति पात्रताम् ।
पात्रत्वाद् धनमाप्नोति, धनाद् धर्मम्, ततः सुखम् ॥

विद्या मानवं मातेव रक्षति, पितेव हितकार्ये नियोजयति, कान्तेव च खेदमपनयति । कथितं चः–

वाराणसी-5

मातेव रक्षति पितेव हिते नियुंक्ते,
कान्तेव चाऽभिरमयत्यपनीय खेदम् ।
लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिम्,
किं किं न साधयति कल्पलतेव विद्या ॥

विद्याविहीनाः जनाः कुत्रापि न शोभन्ते । ये जनाः विद्यायुक्ताः भवन्ति, तेषां सर्वत्र सम्मानं भवति । भूपतयोऽपि विदुषां समक्षं नतमस्तकाः भवन्ति । अतएव इदं उक्तम्ः–

स्वंगृहे पूज्यते मूर्खः स्वग्रामे पूज्यते प्रभुः ।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ॥

विद्याध्ययनं उत्तमं तपः । अनेन तपसा मनुष्यः देवत्वम् आप्नोति । अतः अस्याः विद्यायाः प्राप्त्यै सदा यत्नः कर्त्तव्यः ।

अस्माकं विद्यालयः

मम विद्यालयः

विद्यायाः आलयः विद्यालयः भवति । मम विद्यालयः एकः राजकीयः विद्यालयः । अस्य गणना श्रेष्ठेषु विद्यालयेषु भवति । अयं प्रसिद्धः आदर्शश्च विद्यालयः ।

अस्माकं विद्यालयस्य भवनं नूतनम् आकर्षकं च अस्ति । विद्यालयस्य सुन्दरता अस्माकं हृदयं हरति । भवनं परितः उद्यानमस्ति यत्र मालाकारः तरुलतापादपानां वर्द्धनं रक्षणं च

करोति । पार्श्वे एकं विशालं क्रीडाक्षेत्रम् अपि अस्ति । तत्र छात्राः कन्दुकेन क्रीडन्ति, धावन्ति च । एकः सरोवरः अपि अस्ति । तस्य निर्मले जले छात्राः तरन्ति ।

अस्माकं विद्यालये द्वात्रिंशत् अध्यापकाः संन्ति । सर्वे स्वविषये निपुणाः अध्यापने च दक्षाः सन्ति । ते सर्वे छात्रैः सह स्नेहपूर्णम् व्यवहारं कुर्वन्ति । सर्वे मनोयोगेन पाठयन्ति ।

अत्र सर्वे छात्राः अनुशासनं पालयन्ति । प्रातः निर्धारिते समये आगत्य प्रथमं प्रार्थनागृहे ईशवन्दनां कुर्वन्ति, गुरून् च अभिवादयन्ति । पश्चात् स्व-स्व कक्षासु गत्वा अध्ययनं कुर्वन्ति । अर्धावकाशे एकस्मिन् स्थाने मिलित्वा भोजनं कुर्वन्ति ।

अस्माकं विद्यालयस्य परीक्षा-परिणामः सदा शत-प्रतिशतं भवति । अनेके छात्राः विशेषयोग्यतां प्राप्नुवन्ति ।

एषः न केवलं शिक्षाक्षेत्रे अपितु क्रीडाक्षेत्रेऽपि अग्रगण्योऽस्ति । प्रतिवर्षं प्रादेशिक क्रीडादिवसे अस्य छात्राः प्रथमं स्थानं द्वितीयं स्थानं वा प्राप्य पारितोषिकान् लभन्ते । छात्राः अन्यप्रदेशेषु अपि क्रीडाप्रतियोगितार्थं गच्छन्ति, विजयपताकां च गृहीत्वा उन्नतमस्तकाः च भूत्वा विद्यालयस्य नाम उज्ज्वलं कुर्वन्ति ।

अपि च चित्रकलायां, संगीतप्रतियोगितासु भाषण-प्रतियोगितासु च एषः विद्यालयः शिरोमणिः वर्तते ।

अत्र तु छात्राणाम् अध्यापनम् अतिरिच्य सदाचारः, अनुशासनं, कर्तव्यपरायणं, देशभक्तिः इत्यादयः अनेके गुणाः नैतिकशिक्षामाध्यमेन प्रबोधयन्ते ।

अहं गौरवम् अनुभवामि यत् अस्मिन् विद्यालये प्रवेशं प्राप्य अध्ययनं करोमि ।

विद्यालयस्य वार्षिकोत्सवः

अन्यराष्ट्रीय धार्मिकोत्सवानां सदृशं विद्यालयस्य वार्षिकोत्सवः अपि परमानन्दमयः अवसरः अस्ति । छात्राः स्वविद्यालयस्य वार्षिकोत्सवस्य उत्सुकतया प्रतीक्षां कुर्वन्ति । विद्यालयस्य छात्राः उपाध्यापकाश्च मिलित्वा उल्लासपूर्वकं कमपि उत्सवं मानयितुं वाञ्छन्ति ।

अस्माकं विद्यालयस्य वार्षिकोत्सवः प्रतिवर्षम् अगस्त-मासस्य त्रिंशत् तारिकायां सम्पद्यते । एतस्मिन् वर्षे अस्माभिः विशेषेण उत्साहेन अयमुत्सवः सम्पादितः ।

नियतदिनात् सप्ताहद्वयपूर्वं विद्यालयस्य अध्यापकानां सभा प्रधानाचार्यस्य अध्यक्षतायां भवति यत्र प्रत्येका-ध्यापकस्य कार्यं निर्णीयते । उत्सवस्य कार्यक्रमः पूर्वं एव निश्चीयते। प्रधानाचार्यः वार्षिकविवरणं विद्यालयस्य छात्रेभ्यः पुरस्कार-वितरणस्य सूचीं च स्वयं रचयति । सर्वे छात्राः

नाटकस्य, नृत्यस्य, गीतस्य च पूर्वाभ्यासम् आरभन्ते । प्रतिभागिनः स्व-स्व क्रीडासु अभिनयादिषु च अभ्यासं कुर्वन्ति ।

निश्चिते दिवसे अपराह्ने चतुर्वादनकाले अस्माकं शिक्षा-निदेशकः मुख्यः अतिथिरूपेण आगतः । तस्य स्वागतार्थं प्राचार्यः अन्यैः अध्यापकैः सह माल्यार्पणम् अकरोत् । तदा कार्यक्रमः आरभ्यते । पूर्वं छात्राः भगवन्तं स्तुवन्ति । अनन्तरं प्रधानाचार्यः विद्यालयस्य वार्षिकं विवरणं गतवर्षस्य परीक्षा परिणामं च पठति । सर्वे उपस्थितजनाः एतत् ज्ञात्वा अतीव हर्षिताः जाताः यत् अस्माकं विद्यालयस्य छात्रः बोर्ड-परीक्षायां प्रथमं स्थानम् अलभत् । क्रीडाक्षेत्रे अपि अस्माकं विद्यालयः सर्वोत्तमः घोषितः । एवं विद्यालयस्य प्रगतिं ज्ञात्वा सर्वे करतलध्वनिभिः महान् हर्षः प्रकटीकृतः ।

ततः मनोरंजनार्थं नाटकं दर्शयितुं नानाराग-चित्रित-कपोलाः नानारूपधारिणः छात्राः रंगमंचे समागत्य कुशलतया अभिनीतवन्तः । कैश्चित् कवितापाठाः कृताः समूहगानानि च प्रस्तुतानि ।

अन्ते सभापतिमहोदयेन पारितोषिकवितरणं कृतम् । सः विद्यालयं प्रशंसन् धर्मं चरित्रं च अधिकृत्य एकं सारगर्भितं भाषणम् अकरोत् । तदनन्तरं अध्यापक-छात्र-संघस्य सचिवेन अतिथीन् प्रति कृतज्ञतां प्रकटीकृत्य धन्यवादः अभिव्यक्तः । इत्थं राष्ट्रगानेन सार्धं उत्सवः निर्विघ्नं सम्यक् च सम्पन्नम् अभवत् ।

पुस्तकालयः

पुस्तकानाम् आलयः इति पुस्तकालयः । यत्र पुस्तकानि, पत्रिकाः, समाचारपत्राणि च निधीयन्ते संगृह्यन्ते च यतः च नराः पुस्तकानाम् अध्ययनं ज्ञानवृद्धिं च कुर्वन्ति तत् स्थानं "पुस्तकालयः" अस्ति ।

पुस्तकालयः विविधानां पुस्तकानां भण्डारः भवति । वयम् यानि पुस्तकानि क्रेतुं न पारयामः तानि पुस्तकालये पठितुं शक्नुमः । एवं पुस्तकालयः ज्ञानप्रदानस्य महत्तमं साधनं भवति ।

पुस्तकालयाः बहुविधाः भवन्ति । तेषां मध्ये विद्यालयानां पुस्तकालयाः सार्वजनिक पुस्तकालयाः च प्रमुखाः सन्ति । विद्यालयेषु छात्रोपयोगिनां अध्यापकोपयोगिनां च पुस्तकानां संग्रहः भवति। सार्वजनिकाः पुस्तकालयाः सर्वकारेण संस्थाभिः वा संचालिताः भवन्ति । तेषु विशालः बहुविधः च पुस्तक-भण्डारः भवति । ते सर्वेषां जनानां उपयोगाय भवन्ति । केचित् पुस्तकालयाः स्वसदस्येभ्यः वार्षिकं शुल्कं गृहीत्वा तद्धनेन सुचारुरूपेण संचालिताः भवन्ति । पाठकाः तत्र सदस्यतां प्राप्नुवन्ति, वाञ्छितं पुस्तकं च गृहीत्वा ज्ञानम् उपार्जयन्ति ।

केचित् सचलपुस्तकालयाः अपि भवन्ति । उपयोगि-पुस्तकानि आदाय केचित् वाहनाः दूरस्थ क्षेत्रेषु निश्चिते दिवसे गच्छन्ति, पुस्तकानां वितरणं च कुर्वन्ति ।

पुस्तकालयानाम् अनेके लाभाः सन्ति । पुस्तकालयेषु सर्वेषां रुच्यनुसारं उपन्यासनाटकानि, दार्शनिकपुस्तकानि, इतिहास-अर्थशास्त्र-ज्योतिष-विज्ञान-कृषि-नागरिकशास्त्र पुस्तकानि च वर्तन्ते । पुस्तकालयेषु विविधानि पुस्तकानि विषयानुसारं पृथक्-पृथक् वर्गीकृतानि भवन्ति । तानि अधीत्य नरः आत्मानं समृद्धं कर्तुं पारयति । शोधकार्याय उच्चस्तरीयाध्ययनाय च छात्राः बहुमूल्यकानि सन्दर्भ-पुस्तकानि क्रेतुं न समर्थाः तेभ्यः एतानि पुस्तकानि प्रदाय पुस्तकालयाः एव उपकुर्वन्ति ।

पुस्तकालयेषु कानिचिद् पुस्तकानि तु जनाः तत्रैव पठन्ति, कानिचिद् च स्वगृहम् आनयन्ति । पुस्तकवितरणस्य व्यवस्था पुस्तकालयाध्यक्षस्य संरक्षणे भवति । यः नियतकालानन्तरं पुस्तकं न प्रत्यानयति सः अर्थदण्डं ददाति । अनेन प्रकारेण पुस्तकानां हानिः न भवति । पुस्तकानि यथासमये प्रत्यागच्छन्ति, सर्वजनसुलभानि च भवन्ति ।

पुस्तकानि नरस्य अंतरंगमित्राणि सन्ति । तानि कदापि स्वमित्राणि न वञ्चयन्ति । तेषां सङ्गतिं प्राप्य पाठकः मनोरंजनेन सह परमानन्दमपि लभते । अतः अस्माभिः स्वअतिरिक्तकालः इतस्ततः अपरिभ्रम्य पुस्तकालयेषु एव यापयितव्यः ।

मम प्रियं पुस्तकम्

मम गृहे अनेकानां पुस्तकानां संग्रहः अस्ति । पुस्तकालयेभ्यः अपि अहम् अपश्यन् पुस्तकानि पठामि । अनेकानि मधुराणि विविधानि च पुस्तकानि मया पठितानि । परं तेषु यथा रामायणं मह्यं रोचते न किञ्चिदपि तथा । रामायणं मम प्रियं पुस्तकम् ।

अस्मिन् संसारे सर्वतो मधुरम्, सर्वतो लोकप्रियम्, सर्वतः च अधिक हृदयस्पर्शि काव्यं रामायणम् अस्ति । इदं मूलतः महर्षेः वाल्मीकेः रचना अस्ति, अतः अस्य नाम "श्रीमद् वाल्मीकीयं रामायणम्" अस्ति ।

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत्क्रौंच मिथुनादेकमवधीः काममोहितम् ॥

आदिकवेः वाल्मीकेः मुखात् अयं श्लोकः तदा निस्सृतः यदा सः गंगास्नानोपरान्तं स्वाश्रमं आगच्छन् मार्गे केनचिद् व्याधेन क्रौञ्चयुगलात् एकं पक्षिणं बाणेन विद्धम् अपश्यत् । अस्य श्लोकस्य निर्माणं दृष्ट्वा सः स्वयमेव चकितोऽभवत् । अथ सः ब्रह्मणः नारदस्य च आशीर्वादं प्राप्य रामचरितं रचितवान् । तदेव रामायणं नाम महान् ग्रन्थः ।

रामायणं संस्कृतवाङ्मयस्य आदिकाव्यम् अस्ति । अस्मिन् महाकाव्ये रघुवंशीयस्य रामस्य जन्मनः आरभ्य मृत्युपर्यन्तं संपूर्णकथा विद्यते । अस्य काव्यस्य कथावस्तु एतावत् सम्पूर्णं रोचकं च अस्ति यत् जावा-सुमात्रा-

थाईलैंड-प्रभृतिषु देशेषु अपि विविधासु भाषासु अस्याः अनुवादाः प्रचलिताः अभवन् ।

रामायणे अतीव सरलसंस्कृतस्य प्रयोगः अस्ति । रमणीयालंकृता शैली अस्य काव्यस्य सौंदर्यं द्विगुणयति । प्राकृतिक-वर्णन-रूपेण अत्र वन-नदी-पर्वतानां समुद्रादीनां सूर्य-चन्द्रयोः च मनोहारि वर्णनं विद्यते । अत्र अयोध्या-किष्किन्धा-लंकादीनां सजीवं चित्रं महाकविना प्रस्तुतम् ।

संसारे रामादिवत् प्रवर्तितव्यम्, न तुं रावणादिवत् । जनाः रामवत् पितृभक्ताः, लक्ष्मणवत् भ्रातृभक्ताः, हनुमद्वत् च स्वामिभक्ताः भवेयुः । नार्यः सीतावत् पतिव्रताः धर्म-परायणाः च भवन्तु ।

वस्तुतः रामायणं न केवलं धार्मिकः ग्रन्थः अपितु भारतीयसभ्यतायाः संस्कृतेः च महान् प्रतीकः । रामायण-मधिकृत्य उत्तरकालिकैः बहुभिः कविभिः महाकाव्यानि नाटकानि च रचितानि । यथा-कालिदासस्य रघुवंशम्, भासस्य प्रतिमानाटकम्, भवभूतेः उत्तररामचरितम् च। अद्यापि तमाश्रित्य साहित्यरचना भवत्येव । केनापि कविना रामायणस्य महत्त्वं एवं समुद्घोषितम्—

यावत् स्थास्यन्ति गिरयः समुद्राश्च महीतले ।
तावद्रामायणीकथा लोकेषु प्रचरिष्यति ॥

श्रीमद्भगवद्गीता

गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः ।
या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता ॥

श्रीमद्भगवद्गीतायाः महत्त्वं वचसा केनापि वर्णयितुं न शक्यते । अयम् अतीव रहस्यमयः ग्रन्थः अस्ति । एतस्मिन् ग्रन्थे वेदानां सारः निहितोऽस्ति ।

श्रीमद्भगवद्गीता हिन्दूनां प्रसिद्धतमः ग्रन्थः अस्ति । वस्तुतः गीता महर्षिना व्यासेन कृतस्य महाग्रन्थस्य महाभारतस्य एकः भागः अस्ति । महाभारत-युद्ध-समये यदा अर्जुनः मोहग्रस्तः युद्धविरतः च अभवत् तदा श्रीकृष्णः तं उपादिशत्-'आत्मा नित्योऽस्ति, अतः युद्धे प्रवृत्तो भव', इति । तस्य उपदेशस्य संकलनं गीताशास्त्रे निबद्धं विद्यते ।

आत्मनः अमरतायाः संदेशं गीता ददाति । आत्मा अजरः अमरः चास्ति । अयं न जायते न च म्रियते । आत्मा नित्यः, शरीराणि च अनित्यानि । अतः मरणात् न भेतव्यम् । नरः वीरो भूत्वा अन्यायस्य साम्मुख्यं कुर्यात् । अनेन उपदेशेन अर्जुनः नष्टमोहो भूत्वा धर्मयुद्धे प्रवृत्तः । उक्तं चः–

वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णा-
न्यन्यानि संयाति नवानि देही ॥

गीता उपनिषदां सारः अस्ति । उक्तं चः–

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥

अस्मिन् ग्रन्थे अष्टादश अध्यायाः सप्तशत श्लोकाः च सन्ति । गीतायां वेदानां शास्त्राणां च ज्ञानस्य सारः निहितः वर्तते । अत्र ब्रह्मज्ञानं, निष्कामकर्मणः महत्त्वं, भक्तियोगः इत्यादयः अनेके विषयाः सन्ति ।

गीतायाः भाषा अपि मनोहरा सरला च । परन्तु अस्य ग्रन्थस्य विषयः अति गम्भीरः । एतस्मिन् ग्रन्थे एकोऽपि शब्दः उपदेशहीनो नास्ति ।

गीतायाः अपरं नाम 'कर्मयोगशास्त्रम्' अस्ति । अस्य ग्रन्थस्य मननं कृत्वा मनुष्यः मनसा, इन्द्रियैः शरीरेण वा क्रियमाणेषु कर्मसु कर्तृत्वाभिमानं त्यजति । उक्तं च–

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्वकर्मणि ॥

नायं ग्रन्थः सन्यासमुपदिशति, अपितु अत्र उक्तं-"योगः कर्मसु कौशलम्" । अतः गीता अस्मान् सर्वेषु अपि लौकिककर्मसु कौशलं शिक्षयति ।

गीतायाः अध्ययनेन मनुष्यः आसुरीं संपदं त्यक्त्वा दैवीं संपदम् अर्जितुं प्रवृत्तः भवति । गीतायाः उपदेशानुकूलम् आचरणं कृत्वा सर्वैरपि स्वजीवनमुन्नतं कर्तव्यम् । सुख-शान्तिप्राप्त्यर्थं च अस्याः पठनं पाठनं नित्यं करणीयम् । अतः एव इत्युच्यते–

गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः ॥

महाकविः कालिदासः

को न जानाति विश्व-विश्रुतं कवि-कुल-तिलकं कविरत्नं कालिदासम् । निखिलस्यापि विश्वस्य मनीषिणः समीक्षकाश्च तस्य प्रशस्तिगीतानि अगायन् । अयं हि 'कविकुलगुरुः' इति सर्वे स्वीकुर्वन्ति। एषः एव कविसम्राट् मम प्रियः कविः वर्तते ।.

अयं "कविकुलगुरुः" कदा कुत्र वा अजायत इति न निश्चीयते । केचिद् बङ्गदेशीयम्, अपरे काश्मीरदेशीयम् एव कालिदासमकथयन् । परन्तु तस्य रचनासु सर्वत्र प्रायः उज्जयिनीवर्णनेन अस्य निवासभूमिः उज्जयिनी नगरी एवासीदिति पुरातत्वगवेषकाः कथयन्ति । कालिदासः राज्ञः विक्रमादित्यस्य नवरत्नेषु एकः आसीत् । उक्तं च केनापि–

धन्वन्तरिक्षपणकामरसिंहशंकुवेताल-भट्टघटकर्पर-कालिदासाः
ख्यातो वराहमिहिरो नृपतेः सभायाः रत्नानि वै वररुचिर्नवविक्रमस्य

अयं महाकविः 'रघुवंशम्' 'कुमारसंभवम्' नाम महाकाव्यद्वयम्, 'मेघदूतं' नामैकं खण्डकाव्यम्, 'मालविकाग्निमित्रम्' 'विक्रमोर्वशीयम्', 'अभिज्ञानशाकुन्तलम्', इति च नाटकत्रयं, 'ऋतुसंहारम्' नाम गीतिकाव्यं च व्यरचयत् । एतासु 'अभिज्ञानशाकुन्तलम्' अस्य कवेः विश्वविख्याता सर्वोत्तमा च नाटककृतिः । कालिदासस्य कल्पना शक्तिः अद्भुता, प्रतिभा सर्वतोमुखी, नाटकनिर्माणकौशलम् उत्कृष्टं च आसन् । पाश्चात्य-विद्वांसः कालिदासं भारतस्य शेक्सपियर इति कथयन्ति । कालिदासः उपमासु सर्वान् अधिशेते। उक्तं च–

'उपमा कालिदासस्य' इति । तस्य पद्येषु विविधाः सूक्तयः उपलभ्यन्ते । अतः कविः बाणेन कथितं—

निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु ।
प्रीतिर्मधुरसार्द्रासु मञ्जरीष्विव जायते ॥

कालिदासस्य विशिष्टः गुणः भाषासारल्यमस्ति । अस्य प्रकृतिवर्णनम् अद्भुतम् । अयं महाकविः दृश्य-श्रव्योभयविध-काव्येषु निरुपमं काव्यसौन्दर्यं प्रकटीकरोति । कालिदासः यां सरणिमवलम्बते, तस्याः अतिक्रमणं तु दूरमेव, तुलनायामपि न कोऽपि तिष्ठति । उक्तं चः—

पुरा कवीनां गणनाप्रसंगे कनिष्ठिकाऽधिष्ठितकालिदासः ।
अद्यापि तत्तुल्यकवेरभावादनामिका साऽर्थवती बभूव ॥

एभिः एव गुणैः अयं कविः अद्य अपि यशः शरीरेण जीवति ।

जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः ।
नास्ति येषां यशःकाये जरामरणजं भयम् ॥

महाकविः वाल्मीकिः

पुष्कलम् उर्वरा अस्ति भारत भूमिः । साहित्य-क्षेत्रेऽपि इयं तथाविधान् विदुषः प्रादुरभावयेत् येषां कीर्त्या धवलितम्

अस्ति भूमण्डलम् । तेषु वाल्मीकिः अन्यतमः । सः आदिकविः कथ्यते । स एव मम प्रियः कविः ।

आदिकविः महर्षिः वाल्मीकिः कस्य न नम्यः । स रामायणं रचयामास । रामायणं नाम प्रथमं महाकाव्यम् । लौकिकरचनासु तु रामायणं एव सर्वप्रथमः ग्रन्थोऽस्ति । अतएव वाल्मीकेः गौरवं सुस्पष्टम् ।

महत्तपसः प्रभावेण साधारणः जनः अपि असाधारणं महर्षिपदं प्राप्तुं शक्नोति । वाल्मीकेः जीवनम् अस्य प्रमाण-मस्ति । इदं केवलं दन्तकथा एव, यत् महर्षिः वाल्मीकिः पूर्वं एकः दस्युः आसीत्, तस्य च नाम 'रत्नाकरः" आसीत् ।

स एकदा दस्युकर्मणे काँश्चित् संन्यासिनः अग्रहीत् । तदा संन्यासिनः तम् अवदन् 'येषां कृते त्वं दस्यु-कर्म करोषि किं ते अस्मिन् पापकर्मणि तव सहभागिनो भविष्यन्ति ? रत्नाकरः संन्यासिनः वृक्षे बद्ध्वा निजगृहम् अगच्छत् अपृच्छत् च, क्रमशः पारिवारिकान् सदस्यान् यत् किं यूयं मम पापकर्मणः सहभागिनो भविष्यथ ? ते अवदन्–'अस्माकं पालनं तव कर्त्तव्यम् । न वयं ते पापस्य पुण्यस्य वा कर्मणः सहभागिनो भविष्यामः' इति । इदं श्रुत्वा रत्नाकरस्य ज्ञानचक्षुः उन्मीलितम् । सः संन्यासिनः मुक्त्वा क्षमाम् अयाचत् । संन्यासिनां उपदेशेन स तपस्यायां लीनः अभवत् ।

बहुवर्षपर्यन्तं स समाधिम् अतिष्ठत् । तस्य शरीरं परितः वल्मीकेन आच्छादितम् अभवत् । ततः स वाल्मीकि नाम्ना प्रसिद्धः अभवत् ।

एकदा वाल्मीकिः संध्यासमये तमसायास्तटे भ्रमन्नासीत् तदैव कस्यचिद् व्याधस्य बाणेन क्रौञ्चमिथुनयोः एकः विद्धः भूमौ पतितः । यदा महर्षिः तस्य क्रन्दनम् अश्रृणोत् तदैव सहसा महर्षेः शोकः श्लोकरूपेण निस्सृतः–

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत्क्रौञ्चमिथुनादेकम् अवधीः काममोहितम् ॥

अस्य श्लोकस्य निर्माणं दृष्ट्वा वाल्मीकिः स्वयं चकितः अभवत् । ततः स पुनः समाधिम् अतिष्ठत् । तदनन्तरं ब्रह्मा स्वयं तत्र आगच्छत्, तं च रामचरित्रं लेखितुं अकथयत् । तस्य आशीर्वादेन नारदस्य आदेशेन च वाल्मीकिः रामायणस्य रचनाम् अकरोत् । एतदेव आदिकाव्यम् इति कथ्यते, महर्षिः वाल्मीकिः च आदिकविः इति अभिधानेन प्रसिद्धः ।

काव्य-गुण-गरिमा-दृष्ट्या अपि वाल्मीकेः काव्यं सरलं, सुमधुरं, सहृदयतासंपन्नं मनोहारि च वर्तते । सर्वेषां उदात्त-भावानां तस्मिन् संकलनं विद्यते ।

एभिः गुणैरेव अद्यापि महर्षिः वाल्मीकिः भारतीयैः सादरं स्मर्यते ।

सत्संगतिः

"सत्संगतिः कथय किं न करोति पुंसाम्" ।

मनुष्यस्योपरि संगतेः महान् प्रभावः भवति । संगतिः द्विविधा भवति-सत्संगतिः कुसंगतिः च । सतां, सज्जनानां संगतिः सत्संगतिः कथ्यते । इह जगति नानाविधाः मानवाः दृश्यन्ते । केचित् सज्जनाः भवन्ति, केचित् दुर्जनाश्च । सज्जनाना संगतिः सुखकरी कल्याणकरी च भवति । दुर्जनानां संगतिः दुःखकरी पतनकरी च भवति । अतः दुर्जनस्य संगति-विषये कथ्यते :–

दुर्जनः परिहर्तव्यः विद्ययालंकृतोऽपि संन् ।
मणिना भूषितः सर्पः किमसौ न भयंकरः ॥

जनाः यादृशानां पुरुषाणां सगंतौ वसन्ति ते तादृशाः एव भवन्ति । उक्तं च–

"संसर्गजाः दोषगुणाः भवन्ति" ।

बाल्यकाले संगस्य प्रभावः शीघ्रं भवति । अतः बालकैः सुतरां विमृश्य सतां एव संगतिः कर्तव्यां न दुर्जनानाम् । यथा तक्रयोगात् दुग्धं रूपान्तरं याति, तथैव स्वल्पकालाय अपि असतां संगः सद्गुणं विनाशयति ।

संगप्रभावश्च सर्वेषु लक्ष्यते । शौण्डिकीहस्ते पयः अपि मदिरा इति मन्यते । लंकेश्वरसहवासात् सिन्धुराजः बन्धनं प्राप्तः । मलयाचलगन्धेन इन्धनमपि चन्दनायते । पद्मपत्र-स्थितं वारि मौक्तिकं इव आभाति । यथा चोक्तम् :–

महाजनस्य संसर्गः कस्य नोन्नतिकारकः ।
पद्मपत्रस्थितं वारि धत्ते मुक्ताफलश्रियम् ॥

सत्संगत्या नीचाः साधुतां यान्ति, मानवस्य दोषाः नश्यन्ति, शीलसदाचारस्य च वृद्धिः भवति । सत्संगत्या व्याधः वाल्मीकिः महान् ऋषिः अभवत् । यथा कीटोऽपि सुमन संगात् सतां शिरः आरोहति तथैव सत्संगत्या दुर्जनोऽपि सज्जनतां भजते । यथा चोक्तम् :—

कीटोऽपि सुमनः संगादारोहति सतां शिरः ।
अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितम् ॥

सत्संगतिः मानवं शीघ्रं विद्वांसं करोति, सत्यपथगामिनं करोति, सुकृते संयोजयति, धनोपार्जने समर्थम् करोति, संसारे प्रख्यातं करोति, तस्य कष्टानि परिहरति, पापं दूरी करोति। किं बहुना, सत्संगतिः सर्वाणि अभीष्टानि प्रयच्छति । अतएव भर्तृहरिः स्वनीतिशतके सत्संगतेः महिमानं एवं प्रदर्शितवान् :—

जाड्यं धियो हरति, सिञ्चति वाचि सत्यम्
मानोन्नतिं दिशति पापमपाकरोति ।
चेतः प्रसादयति दिक्षु तनोति कीर्तिम्
सत्संगतिः कथय किं न करोति पुंसाम् ॥

अतः स्वयशोवृद्धये, सुखशान्तिप्राप्तये च सर्वथा सत्संगतिः करणीया, दुर्जनसंगतिश्च हेया ।

अनुशासनम्

नियमपालनमेव अनुशासनमुच्यते । शासनस्य आज्ञायाः, नियमसमुदायस्य च परिपालनम् "अनुशासनम्" मन्यते । परिवारस्य, विद्यालयस्यं, समाजस्य, देशस्य वा ये ये नियमाः भवन्ति तेषां पालनं तदनुसारं च आचरणम् अनुशासनं उक्तम् ।

अनुशासनपालनेन एव मानवः जीवने साफल्यमधिगच्छति । कापि व्यवस्थिता संस्था अनुशासनं विना न चलितुं शक्नोति । अस्माकं जीवनस्य सर्वास्वपि दशासु अनुशासनम् आवश्यकम् । वयं प्रकृतिम् अनुशासने पश्यामः । सूर्यः नियमतः उदेति, नियमानुसारं चास्तं गच्छतिं । सर्वे ऋतवः नियमेन स्वसमये प्रकृतेः शोभां उत्कर्षयन्ति । ग्रहनक्षत्राणि नियमानुसारं स्वस्वमार्गेषु विचरन्ति ।

एवं समाजे, मानवजीवने वा अनुशासनस्य सर्वाधिकं महत्त्वमस्ति । प्रतिस्थानं अनुशासनस्य नियमाः निश्चिताः सन्ति । यथाहि विद्यालये यथासमयम् आगमनम्, गुरूणाम् आज्ञापालनम्, एकाग्रचित्तेन पठनम्, नियतं समवेशधारणम्, निश्चितकालात् पूर्वं विद्यालयात् बहिः न गमनम् इत्यादयः छात्रान् अनुशासनबद्धान् कुर्वन्ति । एतेषु नियमेषु चलनं विद्यार्थिनां प्रथमं कर्त्तव्यम् । इत्थम् अनुशासनेनैव तेषां संस्था कुलं च यशः प्राप्तुं शक्नोति, विद्यार्थिनः अपि महतीं योग्यतां लब्धुं शक्नुवन्ति ।

विद्यालयवत् देशस्यापि अनुशासननियमाः सन्ति । तद्यथा—राजमार्गे वामहस्तदिशा चलेत्, वाहनमपि वामहस्त-दिशा चालयेत् । परधनं न हरेत् । वृद्धानां पीडितानां च सहायतां कुर्यात् । राष्ट्रपतिः, प्रधानमन्त्री, अन्ये मन्त्रिणः, न्यायाधीशाः अपि देशस्य संविधाने लिखितानाम् आदेशानां परिपालनं कुर्वन्ति ।

अद्यत्वे सर्वत्र छात्रेषु नागरिकेषु च अनुशासनहीनता दृश्यते । छात्राः विद्यालयेषु गुरूणाम् आज्ञायाः अवहेलनां कुर्वन्ति, समितिं निर्माय आन्दोलनानि कुर्वन्ति, नागरिकाः अपि राष्ट्रनियमान् उल्लंघयन्ति । राष्ट्रस्य च हानिं कुर्वन्ति । एतत् न उचितम् । अतः देशहिताय सदा अनुशासनम् पालनीयम् ।

यः नरः पूर्णतया अनुशासनं पालयति, सः स्वजीवने सदा सफलः भवति, यः समाजः अनुशासनबद्धः सः लोके उन्नतिः प्राप्नोति । अतः आत्मनः देशस्य, समाजस्य, चोन्नत्यै अनुशासनं नितरां आवश्यकम् ।

परोपकारः

अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।
परोपकारः पुण्याय पापाय परपीडनम् ॥

मनसा, वाचा, कर्मणा च परेषां उपकारः "परोपकारः" कथ्यते । परोपकारस्य महिमा ऋषिभिः महापुरुषैः च बहुधा गीयते । परोपकारेण एव मानवशरीरस्य शोभा विद्यते । यथा हि–

श्रोत्रं श्रुतेनैव न कुण्डलेन,
दानेन पाणिर्न तु कङ्कणेन ।
विभाति कायः खलु सज्जनानां,
परोपकारेण न चन्दनेन ।

संसारे पशुपक्षिवृक्षादिषु अपि परोपकारभावना अस्ति । पृथ्वी परोपकाराय एव अन्नानि उत्पादयति । मेघाः परोपकाराय एव वर्षन्ति । नद्यः परोपकाराय वहन्ति, वृक्षाः परोपकारार्थमेव फलन्ति । गावः परोपकाराय दुहन्ति, तर्हि मानवानां परोपकारे प्रवृत्तिः कथं न स्यात् ? ईश्वरेण मनुष्येभ्यो शरीराणि परोपकाराय एव प्रदत्तानि । उक्तं च–

परोपकाराय फलन्ति वृक्षाः,
परोपकाराय वहन्ति नद्यः ।
परोपकाराय दुहन्ति गावः,
परोपकारार्थमिदं शरीरम् ॥

परोपकाररताः जनाः सदैव उदारहृदयाः भवन्ति । ते समाजं देशं च सर्वथा उपकुर्वन्ति । परोपकारिणः अन्येषां कष्टं स्वकीयं कष्टं मत्वा तन्नाशाय चेष्टन्ते । ते खलु, बुभुक्षितेभ्योऽन्नं, पिपासितेभ्यो जलं, वस्त्रहीनेभ्यो वस्त्रं, निर्धनेभ्यो धनम् च ददति । सत्पुरुषः स्वकीयं दुःखं विस्मृत्य परोपकारकरणे प्रसन्नाः भवन्ति ।

परोपकारः केवलं धनेन न भवति । परोपकारः शरीरेण, मनसा, वाचा, कर्मणा अपि भवति । यथा कोऽपि चक्षुहीनः मार्गे चलितुं असमर्थः, तदा तस्य साहाय्यं शरीरेण भवति । अद्य वयं रक्तदानेन नेत्रदानेन वा परोपकारं कर्त्तुं शक्नुमः ।

परोपकारभावनया एव महाराजा शिविः कपोतरक्षणाय स्वशरीरस्य मांसमपि छित्वा ददौ । दधीचिः देवहिताय स्व प्राणान् त्यक्त्वा स्वीनि अस्थीनि प्रादात् ।

परोपकारेण नहि केवलं परस्यैव लाभो भवति अपितु आत्मतुष्टिः भवति, लोके यशः प्रसरति, परत्र च स्वर्गलाभः भवति । अतः मानवाः परोपकारिणः भूत्वा प्राणिमात्रं उपकुर्वन्तु । उक्तं च महाकविना कालिदासेन–

भवन्ति नम्रास्तरवः फलागमैः
नवाम्बुभिः दूरविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ।

वाराणसी-5

सदाचारः

आचारः परमो धर्मः आचारः परमं तपः ।

आचारः परमं ज्ञानं, आचारात् किं न साध्यते ?

सतां सज्जनानां वा आचारः सदाचारः कथ्यते । नहि कोऽपि बालः इदं ज्ञातुं शक्नोति यत् किं सद्वृत्तम्, किं च असद्वृत्तम् । बालस्तु ज्येष्ठान् वृद्धान् च पश्यति, ते वयोवृद्धाः यथा यथा आचरन्ति बालोऽपि तथा तथा आचरति । अतः सज्जनाः यथा आचरन्ति तथैव आचरणं सदाचारः भवति ।

गुरुजनानां सेवा, श्रेष्ठजनानां समादरः, सत्यवादिता, सरलता, निष्कपटः व्यवहारः, सत्पुरुषाणां संगतिः, परधने परस्त्रीषु च अस्पृहा, इन्द्रियाणां निग्रहः, शीलं, परोपकारः, ईश्वरभक्तिः, सुजनता चेत्यादि गुणानां सदाचारे गणना भवति । एतेषां पालनं सदाचारपालनं निगद्यते ।

सदाचारिणः जनाः स्वकीयानि इन्द्रियाणि वशीकृत्य मानवैः सह शिष्टतापूर्वकं व्यवहरन्ति । सः सदैव सत्यं वदति, माता-पितरौ अभिवादयति, गुरुजनानाम् आदरं करोति, परोपकारं च करोति । आत्मनः उन्नत्यै, यशस्य सुखस्य च प्राप्त्यै सदाचारस्य पालनम् आवश्यकम् । सदाचरणात् वयम् आयुः, विद्यां, बलं, धनं, कान्तिं, यशं च प्राप्नुमः । उक्तं च :–

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।

चत्वारि तस्य वर्धन्ते आयुर्विद्यायशोबलम् ॥

आचारस्य जीवने गरीयान् महिमा वर्तते । "आचारः परमो धर्मः" इति शास्त्रेषु निर्दिष्टम् । सदाचारस्य महिमानं कोऽपि वक्तुं न शक्नोति । समस्तधर्मग्रन्थेषु सदाचारस्य महिमा विभिन्नप्रकारेण वर्णिता विद्यते । यथा–

आचाराल्लभते ह्यायुराचाराल्लभते श्रियम् ।
आचारात् कीर्तिमाप्नोति पुरुषः प्रेत्य चेह च ॥

संसारे ये के च महापुरुषाः अभवन् ते सर्वे सदाचारिणः आसन् । सदाचारपालनेन एव श्री रामचन्द्रः मर्यादा-पुरुषोत्तमः जातः । महात्मा गाँधी आजीवनं सदाचारव्रतम् अपालयत् । पुरा सदाचारपालनेनैव हरिश्चन्द्रः, दधीचिः, अधुना गान्धीमहोदयाश्च अद्यापि यशः शरीरेण जीवन्ति ।

उक्तं च–

सर्वलक्षणहीनोऽपि यः सदाचारवान् नरः ।
श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति ॥

आचारहीनः जनः कस्मै अपि न रोचते । सदाचारिणः सर्वत्र एव आदरं लभन्ते । अतः अस्माभिः अपि सदाचार-नियमानां पालनं कर्त्तव्यम् ।

मम प्रियः शिक्षकः
आदर्शः अध्यापकः

अस्माकं विद्यालये चत्वारिंशत् अध्यापकाः सन्ति । ते सर्वे स्व-स्व विषयस्य विशेषज्ञाः । सर्वे मनोयोगेन अस्मान् पाठयन्ति । तेषु संस्कृत शिक्षकः एव मम प्रियः शिक्षकः अस्ति ।

श्लिष्टा क्रिया कस्यचिदात्मसंस्था,
संक्रान्तिरन्यस्य विशेषयुक्ता ।
यस्योभयं साधु स शिक्षकाणां
धुरि प्रतिष्ठापयितव्य एव ॥

महाकवेः कालिदासस्य इमं श्लोकम् अनुसरन् मम विद्यालयस्य संस्कृत शिक्षकः अस्ति । सः एकः आदर्शः अध्यापकः अस्ति । तस्य मुखं ज्ञानेन; ओजसा, स्मितेन च सर्वदा दीव्यति । सः न केवलं स्वशारीरिकसौन्दर्येण अपितु सद् व्यवहारेण गुणैश्च सर्वेषां श्रद्धापात्रम् अस्ति ।

स सर्वदा प्रातः नियते काले विद्यालयम् आगच्छति । सर्वप्रथमं स्वसुलेखेन मुख्यश्यामपटे दैनिकविचारं लिखति तदनुसारं च आचरितुम् अस्मान् प्रेरयति । ईश्वर-प्रार्थनोपरान्तं स प्रार्थनासभायां स्वमधुरवचनैः उपदिशति । तस्य मुखतेजसा भाषामाधुर्येण च मुग्धाः सर्वे छात्राः ध्यानेन श्रृण्वन्ति ।

सः कक्षायां कदापि विलम्बेन न आगच्छति । सः कक्षायां सदा स्मयमानः दृश्यते । स्नेहेन पाठं पाठयति । उदाहरणैः चित्रैः अन्यैः वा साहाय्ययंत्रैः सः विषयं स्पष्टीकरोति । छात्रैः सह मित्रवत् व्यवहरति । तं दृष्ट्वा सर्वे छात्राः सावधानाः तिष्ठन्ति ।

छात्रेभ्यः कदापि न क्रुध्यति, न कदापि तान् ताडयति । अपशब्दं कटुशब्दं वा न कथयति । यदि कोऽपि छात्रः गृहकार्यं कृत्वा नागच्छति अथवा कक्षायां स्वचापल्यं प्रदर्शयति तर्हि सः मधुरैः वचनैः तम् तथा बोधयति यथा सः छात्रः स्वयमेव लज्जाम् अनुभवति ।

स्वविषये तु तस्य असीमं ज्ञानम् अस्ति । न कोऽपि शब्दः यस्य व्युत्पत्तिः स न जानीयात् । सः श्लोकानां छन्दानुसारं सस्वरं गानं शिक्षयित्वा विषयं रोचकं करोति । अस्मभ्यम् अपि सम्यक् ज्ञानं दत्वैव संतोषम् अनुभवति ।

स विनीतप्रकृतिः, प्रियभाषी, परोपकारी च अस्ति । स निस्संदेहः अध्यापकश्रेष्ठः सर्वप्रियः सर्वगुणसम्पन्नः च परिगण्यते । स एव मम प्रियः शिक्षकः ।

आदर्शः छात्रः

छात्रजीवनं मनुष्यस्य समस्तजीवनस्य आधारशिला अस्ति । अतः आदर्शजीवननिर्माणायं आदर्शछात्रः भवितुं नितान्तमावश्यकं वर्तते । यस्य छात्रस्य जीवनं बहुगुणोपेतम् अन्यैश्च अनुकरणीयं भवति, सः छात्रः आदर्श-छात्रः कथ्यते ।

आदर्शः छात्रः सदाचारी, आज्ञापालकः अभिवादनशीलः, विनम्रः, परिश्रमी च भवति। तस्य दैनिकचर्या नियमबद्धा भवति । सः नित्यं प्रातः चतुर्वादनकाले उत्तिष्ठति । पितरौ प्रणमति । प्रातः कृत्येभ्यः निवृत्तः भूत्वा अध्ययनाय उपविशति । ईश्वरभजनं कृत्वा प्रातराशोपरान्तं समये विद्यालयं गच्छति ।

विद्यालये गुरुजनान् अभिवादयति । कक्षायां पूर्णध्यानेन पाठान् पठति, श्रृणोति च । कक्षायां तूष्णी तिष्ठति । कदापि केनापि सह द्वन्द्वं न करोति । विद्यालयस्य किमपि वस्तु न नाशयति । विद्यालयनियमान् पालयति । अनुशासनभंगं न करोति ।

गृहमागत्य नित्यं विद्यालयात् प्राप्तं गृहकार्यं पूर्णं करोति । अतिरिक्त ज्ञानवर्धनाय विविधपुस्तकानाम् अध्ययनं करोति । सायंकाले सः स्वरुच्यानुसारं क्रीडितुमपि गच्छति । गृहम् आगत्य सन्ध्यावन्दनं कृत्वा रात्रौ दशवादनकाले स्वपिति । दूरदर्शनस्य केवलं ज्ञानवर्धककार्यक्रमान् एव पश्यति ।

आदर्शछात्रस्य लक्षणानुसारे सः सर्वदा व्यवहरति । यथा चोक्तं छात्रलक्षणम् :–

काकचेष्टा, बकोध्यानं, श्वाननिद्रा तथैव च ।
अल्पाहारी, गृहत्यागी, विद्यार्थी पञ्चलक्षणम् ॥

विद्यालये सांस्कृतिककार्यक्रमेषु अपि भागं गृह्णाति । कक्षायां प्रथमं स्थानं गृहीत्वा पित्रोः विद्यालयस्य च नामोन्नतं करोति । सः वस्तुतः विद्यार्थी न तु सुखार्थी । सः अवगच्छति यत्–

"क्षणे नष्टे कुतो विद्या, कणे नष्टे कुतो धनम्"

अतः क्षणमपि न नाशयति । प्रतिक्षणं विद्यार्जनाय अनन्यमनसा यापयति । स्वभावेन सः शिष्टः भाषया च मधुरः । यः कोऽपि एकस्मिन् अवसरेऽपि तेन सार्द्धं जल्पति स न कदापि तं विस्मरति । सर्वदा स्मिते मुखेन एव अभिवादयति जल्पति च ।

सत्यं सः एव एकः आदर्शः अनुकरणीयः च छात्रः ।

समयस्य सदुपयोगः

समयस्य समुचितेन रूपेण उपयोग एव 'समयस्य सदुपयोगः' कथ्यते । यद्यपि सदुपयोगः सर्वेषामपि वस्तूनां

कर्तव्यः, नहि किमपि वस्तु दुरुपयोगाय भगवता निर्मितम् । तथापि समयस्य सदुपयोगाय विशेषरूपेण ध्यानं दातव्यम् ।

संसारे बहूनि वस्तूनि बहुमूल्यानि सन्ति, परं तेषु सर्वापेक्षया बहुमूल्यं वस्तु समय एव वर्तते । यतः अन्यानि वस्तूनि विनष्टानि अपि पुनः लब्धुं शक्यन्ते, परन्तु व्यतीतः समयः केनाप्युपायेन पुनः लब्धुं न शक्यते । धनं विनष्टं पुनः उपार्जितुं शक्नोति, यशो विनष्टः पुनः सत्कर्मणा उपार्जयितुं शक्यते, परं विनष्टः समयः सहस्रैरपि प्रयत्नैः पुनः दुर्लभ एव ।

ऋतुर्व्यतीतः परिवर्तते पुनः क्षयं प्रयातः पुनरेति चन्द्रमाः ।
गतं गतं नैव तु सन्निवर्तते जलं नदीनां च नृणां च यौवनम् ॥

अतएव समयः सर्वाधिकं बहुमूल्यं वस्तु मन्यते । तस्मात् सर्वैः मनुष्यैः तथा प्रयत्नः कर्तव्यः यथा एकमपि क्षणं निरर्थकं न भवेत् । ये जनाः प्रमादेन आलस्येन वा समयं यापयन्ति, उचिते समये कार्यं न सम्पादयन्ति, अथ च कथयन्ति—एतत् कार्यं श्वः करिष्यामि, परश्वः करिष्यामि—एवम् आत्मानं प्रतारयन्ति, ते कदापि स्वकार्ये सफलतां न लभन्ते । उक्तं च :—

आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः ।
क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम् ॥

अस्माकं देशे बहवः जनाः समयस्य महान्तं दुरुपयोगं कुर्वन्ति । केचित् वृथा शयनेन, वृथा भ्रमणेन, निरर्थक-वार्तालापेन, वृथा कलहेन च स्वजीवनस्य अधिकतरं भागं

वृथा यापयन्ति । ते न स्वार्थमेव साधयन्ति न परार्थमेव। तेषां जन्म निरर्थकमेव भवति ।

समयः स्वल्पोऽस्ति, कर्तव्यानि बहूनि सन्ति । अस्यामवस्थायां ये जनाः समयस्य सदुपयोगं न कुर्वन्ति ते मूर्खाः एव । ये जनाः एकैकस्य क्षणस्य बहुमूल्यं मन्यन्ते, ते एव बुद्धिमन्तः सन्ति ।

प्रथमे नार्जिता विद्या, द्वितीये नार्जितं धनम् ।
तृतीये नार्जितं पुण्यं, चतुर्थे किं करिष्यति ॥

छात्राणां कृते तु समयस्य महती उपयोगिता भवति । एकैकमपि क्षणममूल्यं भवति । उक्तं च :–

क्षणशः कणशश्चैव विद्यामर्थं च साधयेत् ।
क्षणे नष्टे कुतो विद्या कणे नष्टे कुतो धनम् ॥

समाचारपत्रम्

समाचारस्य पत्रं यः, नित्यं पठति मानवः ।
स ज्ञानी मनीषी च, सत्यं भवति पण्डितः ॥

सर्वे पुरुषाः नार्यश्च स्वस्य नगरस्य, प्रान्तस्य, देशस्य, विदेशानां च समाचाराणि ज्ञातुं, प्रतिदिनं नवीनां सामाजिकीम् अवस्थां च परिज्ञातुं सर्वदैव समुत्कंठिताः

भवन्ति । तेषां औत्सुक्यस्य शमने समाचारपत्रमेव सुलभं साधनं विद्यते ।

समाचारपत्राणि बहुविधानि भवन्ति । कानिचित् समाचारपत्राणि दैनिकानि सन्ति, अन्यानि च साप्ताहिकानि, पाक्षिकाणि, मासिकानि च भवन्ति । दैनिक समाचार पत्रेषु दिवसमात्रस्य, साप्ताहिकेषु सप्ताहमात्रस्य, तथा मासिकेषु मासमात्रस्य समाचाराणि च उपलभ्यन्ते । विविधभाषासु समाचारपत्राणि प्राप्यन्ते । हिन्दी, संस्कृत, आंग्ल, बंगला, गुजराती, पंजाबी, मराठी इत्यादयः सर्वासु भाषासु समाचार-पत्राणि. उपलभ्यन्ते ।

जगति मानवजीवने समाचारपत्राणां महती. उपयोगिता वर्तते । अनेन स्वगृहे एव स्थिताः जनाः अल्पव्ययेन एव स्वदेशस्य विदेशानां च अभिनवसमाचारान् ज्ञात्वा विश्वस्य मानवैः सह सम्बन्धं स्थापयन्ति । कृषि, उद्योग, शिल्प, स्वास्थ्य, विज्ञान, चिकित्सा, क्रीड़ा चेति नानाविधानां ज्ञातव्य-विषयाणां ज्ञाने समाचारपत्राणि बहु उपकारीणि भवन्ति ।

समाजसुधारसम्बन्धीनि अनेकानि उदाहरणानि समाचार-पत्रेषु प्राप्यन्ते येन पाठकानां मनसि समाजसुधारस्य भावना उत्पन्नं भवति। शासनविधानानां समाचाराणि अपि समाचार-पत्रेषु प्रकाश्यन्ते ।

समाचारपत्राणां पठनेन न केवलं व्यावहारिकं ज्ञानं वर्धते, अपितु भाषाज्ञानं शब्दराशिवर्धनं च भवति ।

समाचारपत्रेषु न हि केवलं समाचाराः एव भवन्ति, तेषु चारित्रिक, सांस्कृतिक, सामाजिक विचाराः अपि प्रकाशिताः भवन्ति । बालविभागेन बालानां ज्ञानं वर्धते ।

सत्यम्, समाचारपत्रं वर्तमानमनुष्यस्य मानसिकं भोजनं वर्तते । अस्मिन् युगे समाचारज्ञानशून्यः पुरुषः कूपमण्डूकवत् भवति ।

मम प्रियक्रीड़ा

क्रीडनं मनुष्यस्य स्वभाव एव । क्रीडाः न केवलं मनोरंजनाय भवन्ति अपि तु बुद्धेः विकासाय स्वास्थ्यवर्धनाय च भवन्ति । बाल्यात् प्रभृति एव मनुष्यः किंचित् क्रीडत्येव ।

अद्यत्वे अनेकाः क्रीडाः सर्वस्मिन् जगति प्रचलिताः । तेषां क्रिकेट, पादकन्दुकं, हस्तकन्दुकं, दण्डकन्दुकं इत्यादयः अन्तर्राष्ट्रियासु प्रतियोगितासु प्रमुखाः सन्ति । काचित् भारतीयाः क्रीडाऽपि शनैः शनैः प्रचलिता । कबड्डी एवंविधा क्रीडाऽस्ति ।

कबड्डी मम प्रिया क्रीडा अस्ति । अस्यां क्रीडायां द्वौ पक्षौ भवतः । एकस्मिन् पक्षे प्रायेण एकादश क्रीडकाः भवन्ति । एकस्य पक्षस्य क्रीडकः द्वितीयस्य पक्षस्य क्षेत्रे 'कबड्डी-कबड्डी' इति एकस्वरेण श्वासम् अवरुध्य सततं

उच्चरन् आक्रामति । सः अपरपक्षस्य क्रीडकं स्प्रष्टुं यत्नः करोति । यदि स कमपि स्पृष्ट्वा स्वक्षेत्रं आगच्छति तदा स्पृष्टः क्रीडकः 'मृत' इति मन्यते । तदा द्वितीय पक्षस्य क्रीडकः प्रथमपक्षक्षेत्रे तथैवागच्छति । सोऽपि परपक्षस्य कमपि क्रीडकं स्प्रष्टुं यत्नः करोति । एवं वारंवारं द्वयोरपि पक्षयोः क्रीडकाः परपक्षे आक्रामन्ति । यस्य पक्षस्य अधिक-संख्याः क्रीडकाः नियते समये बहिर्गताः 'मृताः' भवन्ति तस्य पक्षः पराजितः इति उद्घोष्यते ।

कबड्डी अति रुचिकरा क्रीड़ा । भारतस्य सर्वेषु प्रदेशेषु लोकप्रिया वर्तते । पाकिस्तान, बंगलादेश, नेपाल इत्यादयः देशेष्वपि कबड्डी क्रीडयन्ति जनाः । अधुना एशियाड क्रीडा प्रतियोगितासु कबड्डी स्वीकृता । ओलम्पिक प्रतियोगितासु अनुमोदनाय प्रयतन्ते ।

रुचिकरा क्रीडा

"शरीरमाद्यं खलु धर्मसाधनम्" इति प्रसिद्धम् । क्रीडा शरीरस्य स्वास्थ्याय एकः उत्तमः व्यायामः वर्तते । क्रीडायां प्रवृत्तिः मानवे बाल्यकालाद् एव दृश्यते । क्रीडायां शारीरिक-बलेन सह बुद्धिकौशलम् अपि अपेक्षितम् । सामूहिकक्रीडनैः

बालेषु सहयोगभावना वर्धते यः राष्ट्राय सर्वथा हितकारी। अतएव आधुनिकपाठ्यक्रमे विद्यालयेषु क्रीडा एकः अनिवार्यः विषयः घोषितः।

क्रिकेट, हाकी, कबड्डी, पादकन्दुकं, शतरंजः प्रभृतयः अनेकाः प्रमुखाः क्रीडाः सन्ति। परं सर्वासु रुचिकरा 'शतरंजः' वर्तते। एषा क्रीडा बुद्धिपरका वर्तते। क्रीडायां केवलं द्वौ क्रीडकौ पर्याप्तौ। स्वगृहे अन्तः स्थित्वा एव एषा क्रीडितुं शक्या। अस्याः क्रीडने मनोरंजनेन सह बुद्धिः अपि प्रखरा जायते।

अस्याः कृष्णश्वेतवर्णाः द्वात्रिंशत् अक्षाः सेनाः कथिताः। एकस्मिन् वर्गाकारे काष्ठपटे चतुर्षष्टिः वर्गाकारलघ्वाकृतयः सन्ति। सेनायां प्रमुखौ कृष्णश्वेतौ राजानौ राज्ञौ च स्तः। विपक्षिराजानं वशीकरणं सेनासहायतया च तं बंदीकरणं एव क्रीडकयोः उद्देश्यं वर्तते। स्वप्रतिभया यः समन्ततः राजानं बन्धनं करोति सः विजयी भवति। एवं सततं उत्सुकतापूर्णमपि इदं क्रीडनम् अस्ति।

अस्याः क्रीडायाः प्रारम्भः सर्वप्रथमं भारतदेशे एव अभवत्। पुरा राजसु एषा क्रीडा अतीव प्रचलिता आसीत्।

अनया क्रीडया धैर्यस्य संयमस्य च भावना प्रचुरमात्रायां प्रकटीभूता भवति।

अस्माकं देशः

भाति सर्वेषु देशेषु
रतिः सर्वेषु जन्तुषु
तरणं सर्व-तीर्थानाम्,
तेन भारतमुच्यते ।

अस्माकं देशः भारतदेशः संसारस्य देशेषु सुन्दरतमः । अस्य देशस्य प्राचीनं नाम आर्यावर्तः आसीत् । पुरा अत्र दुष्यन्तो नाम राजा अभवत् । तस्य पुत्रः भरतः वीरः अभवत् । तस्य नाम्ना एव अस्य देशस्य नाम "भारतम्" जातम् । प्रजानाम् भरणात् अपि भारतं उच्यते ।

बहवः महापुरुषाः स्वजीवनेन इमां धन्यमकुर्वन् । अयं विशालः देशः अस्ति । अस्मिन् देशे विविधाः प्रदेशाः सन्ति । विशालाः पर्वताः, शीतलानि हिमशिखराणि, दीर्घाः नद्यः, मनोहराणि वनानि च सन्ति । सुजला, सुफला, शस्यश्यामला अस्य धरा देवानामपि चित्तानि आकर्षति । उक्तं च :–

गायन्ति देवाः किल गीतकानि
धन्यास्तु ते भारतभूमिभागे ।
स्वर्गापवर्गास्पदहेतुभूते
भवन्ति भूयः पुरुषाः सुरत्वात् ॥

हिमालयः अस्य मस्तकम् । कश्मीरप्रदेशः अस्य देशस्य मुकुटम् । असमप्रदेशः अस्य वामभुजः । पञ्चनदप्रदेशः अस्य

दक्षिणभुजः । मध्यप्रदेशः अस्य हृदयम् । समुद्रः अस्य चरणौ क्षालयति ।

हिमालयात् उद्भूताः नद्यः भारतभूभागं सिंचन्ति । भूमिं शस्यश्यामलां च कुर्वन्ति । वर्तते अत्रैव गंगा नदी यस्याः जलं पात्रे स्थितं चिरकालेऽपि विकृतं न भवति । भारत-देशस्य दक्षिणस्यां दिशि हिन्दमहासागरः अस्ति । तस्मात् उत्थिताः मेघाः भारते वर्षन्ति, महत् अन्नं च उत्पादयन्ति ।

अद्यत्वे भारते अनेकानि राज्यानि उपराज्यानि च सन्ति। तत्र प्रादेशिकविधानसभाः शासनं कुर्वन्ति । उपराज्येषु केन्द्रीयशासनेन प्रबन्धः क्रियते । सर्वेषां राज्यानां प्रतिनिधयः लोकसभायाःसदस्याः भूत्वा लोकहितैषिणः नियमान् निर्मान्ति, सम्पूर्णं राज्यं च सुखसमृद्धं कर्तुं प्रयतन्ते । अतएव अस्माकं देशस्य शासनं लोकतन्त्रं उच्यते । दिल्लीनगरम् अस्य देशस्य राजधानी केन्द्रं च अस्ति ।

दक्षिणभारतस्य चत्वारः प्रदेशाः सन्ति । आन्ध्रप्रदेशः, कर्नाटकप्रदेशः, तमिलनाडुप्रदेशः, केरलप्रदेशः च । श्रीशंकरा-चार्यः, श्रीरामानुजाचार्यः, श्रीवल्लभाचार्य च दक्षिणभारतस्य महापुरुषाः सन्ति । भारते एव राम, कृष्ण, बुद्ध, विवेकानन्द, महावीर प्रभृतयः महापुरुषाः चाजायन्त ।

पुरा भारतं पराधीनमासीत् । परं देशवासिनां सौभाग्येन पटेल, सुभाष, तिलक, नेहरू, महात्मा गाँधी प्रभृतीनां राष्ट्र-

भक्तानां राष्ट्रभक्त्या बलिदानेन च देशः 1947 तमे वर्षे स्वतन्त्रः जातः ।

अस्माकं देशे विविधाः जातयः, सम्प्रदायाः, भाषाः च सन्ति, परम् अनेकासां भाषाणामुद्गमः संस्कृतभाषायाः अस्ति, अनेकेषां च सम्प्रदायानामुद्गमः वैदिकसंस्कृतेः अस्ति । अस्माकं भारतभूमिः चैका । अतः ये भारते वसन्ति ते सर्वे एव भारतभूमेः सुताः, परस्परं च बान्धवाः, यदि वयं सहयोगेन कार्यं करिष्यामः परस्परं च स्नेहेन मिलित्वा स्थास्यामः, तदा अस्माकं सर्वेषां कल्याणं भविष्यति । यदि च वयं परस्परं घृणां द्वेषं च दर्शयिष्यामः तदा अस्माकं देशस्य महती हानिः भविष्यति । अतः सर्वेषां एतत् परमं कर्त्तव्यम् अस्ति यत् सर्वे अत्र समभावेन वसन्तु, सदैव चास्य रक्षायै तत्पराः सन्नद्धाः च भवन्तु ।

हिमालयः

हिमालयः नाम पर्वतः पर्वतेषु उच्चतमः । अस्य शिखराणि आकाशं स्पृशन्ति । महाकविः कालिदासः कुमारसम्भवनाम- महाकाव्ये इमं पर्वतं पृथिव्या मानदण्डमेव कथयति । यथा–

अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधीऽवगाह्य
स्थितः पृथिव्या इव मानदण्डः ॥

हिमालयः नाम महीधरः भारतस्य उत्तरस्यां दिशि अस्ति। अयं गिरिः सर्वदा हिमेन आच्छादितः भवति, हिमस्य आलयः अर्थात् स्थानम् अस्ति, अत एव 'हिमालयः' इत्युच्यते। अयं पर्वतः संसारे सर्वेभ्यः पर्वतेभ्यः उन्नतोऽस्ति, अतोऽयं पर्वतराजः' इति कथ्यते।

हिमालयस्य दैर्घ्यम् अष्टशतं क्रोशाः विस्तारस्तु अवरतः पञ्चसप्ततिः क्रोशाः, परमतः पञ्चाशदुत्तरशतम् क्रोशाश्च भवन्ति। दैर्घ्येण वैशाल्येन औन्नत्येन च हिमालयोऽयं सर्वान् पर्वतानतिशेते। न केवलं भारतखण्डे किन्तु समग्रेऽपि भूमण्डले नास्त्येतादृशोऽन्यः पर्वतः। अतोऽयं 'नगाधिराजः' इति व्यपदिश्यते।

अस्य प्रसिद्धानि शिखराणि कैलास, गौरीशंकर प्रभृतीनि सर्वस्मिन् संसारे प्रसिद्धानि। इदं गौरीशंकर नाम शिखरं आरोढुं बहुवर्षं अनेके जनाः महान्तं प्रयत्नम् अकुर्वन्। 1953 तमे ईशवीयाब्दे आंग्लदेशीयः हिलेरी महोदयः भारतीयः तेनसिंहश्च तत् शिखरं स्प्रष्टुं सफलौ अभवताम्।

हिमालयात् गंगा, यमुना, शतद्रुः, विपाशा, इरावती, ब्रह्मपुत्रा, वितस्ता च प्रसिद्धा नद्यः उत्पन्नाः भवन्ति।

हिमालयः मेघाणां वर्षणे अपि भारतस्य सहायकः । दक्षिणसागरात् उत्थाय ये मेघाः आगच्छन्ति, ते हिमालयस्य उच्चैः शिखरैः संघट्टयन्तः परावर्तन्ते, भारतस्य भूमौ च वर्षन्ति । एवं च एषः पर्वतः नदीभिः मेघैः च भारतभूमिं सिञ्चति । अतः भारतभूमौ अन्नानि फलानि च पर्याप्तानि भवन्ति ।

हिमालये बहुविधाः वनस्पतयः, ओषधयः, धातवः, रत्नानि च उपलभ्यन्ते । अस्य गिरेः अनेकानि प्रसिद्धानि तीर्थस्थानानि सन्ति । तेषु बद्रीनाथः, केदारनाथः, अमरनाथः च एते प्रसिद्धाः सन्ति । तेषु तीर्थेषु प्रतिवर्षं लक्षशः जनाः गत्वा देवदर्शनेन धर्मार्जनं कुर्वन्ति । अद्यापि हिमालयस्य गुहासु अनेके विरक्ताः, सिद्धाः योगिनः च तपस्तपन्ति ।

हिमालयस्य शीतप्रधानेषु मंसूरी-शिमला-श्रीनगरादिषु नगरेषु ग्रीष्मकाले तापेन व्याकुलाः जनाः गच्छन्ति। तत्र स्वास्थ्यवर्धकानि अपि स्थानानि सन्ति । रुग्णाः जनाः तत्र गच्छन्ति स्वस्थाः च भवन्ति ।

अयं पर्वतराजः भारतं उत्तरदिशः शत्रुभ्यः रक्षति, अस्मात् हिमालयः भारतस्य "प्रहरी" मन्यते । अद्यत्वे भारतशासनं हिमालयस्य रक्षायै तत्परम् अस्ति । वस्तुतः हिमालयस्य रक्षणे भारतस्य रक्षणम् ।

वस्तुतः हिमालयः भारतस्य गौरवं विद्यते । अस्य महिम्नः कारणेनैव भगवान् श्रीकृष्णः गीतायां, "स्थावराणां हिमालयः" इत्युक्त्वा तं निजं विभूतिषु अगणयत् ।

मातृभूमिः

"जननी जन्मभूमिश्च स्वर्गादपि गरीयसी"

दशानने हते लंकायाः वैभवं दृष्ट्वा लक्ष्मणः श्रीरामं लंकाधिपतिः भवितुम् अकथयत् तदा श्रीरामः प्रत्यवदत् :–

अपि स्वर्णमयी लंका न मे लक्ष्मण रोचते ।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ॥

संसारे जनाः स्वर्गसुखं सर्वोपरि मन्यन्ते किन्तु तत् केवलं काल्पनिकं वर्तते । जननी अस्मभ्यं यानि सुखानि यच्छति, अथ च जन्मभूमिः अस्मभ्यं यानि सुखानि ददाति तानि प्रत्यक्षानि सुखानि स्वर्गात् अपि श्रेष्ठतराणि सन्ति ।

जनन्याः वात्सल्यं तु अनुभूतेरेव विषयम् । तस्याः स्नेहं, प्रेमपालनं, स्निग्धां दृष्टिं च वर्णयितुं कः प्रभवः? जननी जन्मतः प्रभृति अतीव प्रेम्णा पालयति, स्वदुग्धेन वर्धयति, स्वयं कष्टानि सोढ्वा अस्मान् सुखयति । अस्माकं सर्वाः इच्छाः पूरयितुं सदा यतते । स्वयं अभुक्त्वा अपि अस्मभ्यं

भोजनं यच्छति । अतः इदं सत्यं यत् जननी मानवेभ्यः स्वर्गादपि अधिकं सुखं प्रयच्छति ।

जन्मभूमिरपि जननी इव अस्मान् पालयति । सा अस्मभ्यं जलं, फलम्, अन्नं च ददाति, अतएव सा वसुन्धरा कथ्यते । वयं स्वदेशस्य वायौ श्वसिमः, स्वदेशस्य एव जलं पिबामः, स्वदेशस्य एव भूमौ वसामः । भूमिः अस्मभ्यं धनं, धान्यं, धातून्, रत्नानि च प्रयच्छति । मातृभूमिः स्वान्नैः जलादिभिश्च यावज्जीवनम् अस्मान् पालयति पोषयति च । जन्मभूम्या प्रदत्तं सुखं वस्तुतः स्वर्गसुखादपि अधिकं वर्तते ।

तयोः जननी-जन्मभूम्योः कृते अस्माकम् अपि किंचित् कर्त्तव्यमस्ति । मातुः आज्ञापालनं प्रथमं कर्त्तव्यम् । तस्याः कष्टकाले रुग्णावस्थायां वा प्रेमभावेन मनसा शुश्रूषा करणीया ।

एवं जन्मभूमेः रक्षणम् अस्माकं कर्त्तव्यम् । देशभक्ताः तु स्वदेशस्य रक्षार्थं स्वप्राणान्, सुखमपि त्यजन्ति । देशभक्तस्य चित्तं स्वर्गेऽपि न तादृक् रमते यादृक् निजजन्मभूमौ । केनापि उक्तं च :–

स्वर्गात् स्वदेशोऽस्त्यधिकः प्रियो मे, दुःखे सुखे चाश्रयणीय एषः ।
कृपासुधाब्धे । करुणेश । देव, प्रयच्छ मह्यम् निजदेश भक्तिम् ॥

वाराणसी क्षेत्रम्

अयोध्या मथुरा माया काशी कांचिरवंतिका ।
पुरी द्वारावती चैव सप्तैताः मोक्षदायिकाः ॥

अस्माकं भारतवर्षे तत्र तत्र बहूनि तीर्थक्षेत्राणि सन्ति । तेषु अयोध्या, मथुरा, माया, काशी, काञ्ची, अवन्तिका, द्वारावती इत्येतानि प्रधानभूतानि । तत्रापि वाराणसी पुराणेषु अतिशयेन वर्ण्यमानमनुत्तमं पुण्यक्षेत्रम् अस्ति । इदं काशी नाम्ना अपि प्रसिद्धं वर्तते ।

वाराणसी अतीव प्राचीनतमं तीर्थस्थानम् अस्ति । अनेकेषु प्राचीनग्रन्थेषु अस्य महिमा वर्णितः अस्ति । स्कन्दपुराणस्य काशीखण्डे अस्याः वाराणस्याः विस्तारेण वर्णनं विहितं वर्तते ।

इयं नगरी भारतवर्षस्य पूर्वोत्तरभागे अवतिष्ठति । सैषा गंगायाः पश्चिमे तटे वसति । गंगायां स्नानेन तत्तीर्थ-जलपानेन च जनाः पवित्रं भवन्ति, मुक्तिं च प्राप्नुवन्ति इति वेदाः उद्घोषयन्ति । उक्तं च :–

भगवद्गीता किञ्चिदधीता गंगाजललवकणिका पीता ।
सकृदपि येन मुरारिसमर्चा क्रियते तस्य यमेन न चर्चा ॥

अतः भारतवर्षस्य सर्वेभ्यो स्थानेभ्यः जनाः गंगास्नानार्थं काशीं गच्छन्ति । अत्र गंगातटस्य शोभा मनोहरं वर्तते । स्थाने-स्थाने प्रस्तरनिर्मितानां घट्टानां शोभां विलोक्य जनाः मुह्यन्ति । घट्टेषु राजघट्ट, पंचगंगाघट्ट, मणिकर्णिकाघट्ट,

दशाश्वमेधघट्ट, हरिश्चन्द्रघट्ट, तुलसीघट्ट, अस्सीघट्टाश्च प्रसिद्धाः सन्ति ।

काशी मन्दिराणां कृते प्रसिद्धाऽस्ति । अत्रैव विश्वनाथस्य प्रसिद्धं सुवर्णमयं मन्दिरम् अस्ति । अन्यानि अपि बहूनि मन्दिराणि सन्ति । यत्र अन्नपूर्णा मन्दिरं, दुर्गा मन्दिरं, कालभैरव मन्दिरं, संकटमोचन मन्दिरं, मानसमन्दिरं, विश्वविद्यालयस्य प्राङ्गणे स्थित विश्वनाथ मन्दिरञ्च प्रसिद्धानि सन्ति ।

काशी नगरी प्राचीन कालतः भारतीयविद्यायाः कुलभवनमिव भाति । अधुनाऽपि श्री सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, काशी हिन्दू विश्वविद्यालयः, काशी विद्यापीठश्च त्रयः विश्वविद्यालयाः अस्याः शोभां वर्धयन्ति । अत्र अनेके विख्याताः पंडिताः जाताः सन्ति । अत्रत्यानां पंडितानां गणना समस्तविद्यापारंगत्वेन भवति ।

पुरा नगरमिदं हाटकमयं बभूवेति श्रूयते । इदानीं तु केवलं शिलामयं दृश्यते । शास्त्रेषु वर्णितमस्ति यत् इयं नगरी भगवतः शंकरस्य त्रिशूलोपरि विराजते न तु वसुन्धरायाम् । तथा च इयमेव बहोः कालात् मुक्तये प्रसिद्धा अस्ति । उक्तं च :–

"काश्यां मरणात् मुक्तिः"

अत्र जनानां जीवितान्तिमक्षणे भगवान् विश्वनाथः कर्णे तारकमन्त्रं उपदिशति, येन ते मुक्तिभाजां भवन्ति ।

एवं वाराणसी अस्माकं पवित्रं तीर्थस्थानम्, विद्यायाः विश्वविख्यातं केन्द्रम्, जनानां मुक्तिदात्री नगरी च अस्ति। अहो वाराणसी क्षेत्रमहिमा।

अस्माकं नगरम्
दिल्ली नगरी

अहं दिल्लीनगरे वसामि। दिल्ली प्राचीनतमा नगरी। इयं बहूनां भारतीयानां शासकानां राजधानी आसीत्। "इन्द्रप्रस्थः" इति अस्याः प्राचीनम् अभिधानम्। अस्याः वैभवम् अद्भुतम्।

इदं नगरं ऐतिहासिकं वर्तते। अत्र बहूनि प्राचीनानि स्थानानि दर्शनीयानि सन्ति। दूरदेशान्तरेभ्यः अत्र पुरुषाः आगत्य अत्रत्यानि दर्शनीयस्थानानि विलोक्य आनन्दम् अनुभवन्ति। अत्र सर्वत्र उच्चभवनानि सन्ति।

अस्य नगरस्य द्वौ भागौ स्तः। प्राचीना दिल्ली, नवीना दिल्ली च। प्राचीन दिल्ली भागस्य भवनानि प्राचीनप्रणाल्यः सन्ति। तेषु भारतस्य प्राचीनसांस्कृतिका कला मुखरिता अस्ति। प्राचीनदिल्लीनगर्यां चाँदनीचौक, रक्तदुर्ग, जामा-

मस्जिद्, यमुनासेतु, राजघाट, शान्तिघाट इति नामानि दर्शनीयस्थानानि सन्ति ।

अस्माकं दिल्लीनगरस्य नवीनः भागः अतीव सुन्दरः, स्वच्छः, स्वास्थ्यकरः च । नवीन दिल्लीनगरे कनाटप्लेस नामकं स्थानम्, बिरलामन्दिरम्, ज़न्तरमन्त्रम्, कुतुबमीनारम्, मुगलगार्डननामकस्थानम्, संसदभवनम्, राष्ट्रपतिभवनम्, त्रिमूर्तिभवनं च दर्शनीयानि स्थानानि ।

अस्माकं नगरं 'दिल्ली' भारतस्य राजधानी अस्ति । अतः अत्र विभिन्नदेशानां दूतावासाः सन्ति । राष्ट्रपतिः महोदयः, प्रधानमन्त्री, अन्ये अपि संसदसंदस्याः अत्रैव निवसन्ति । उच्चतमः राज्याधिकारिणः च अत्रैव वसन्ति ।

भारतस्य राजधान्यां दिल्लीनगर्यां स्वतन्त्रतादिवस-समारोहः, गणतन्त्रदिवससमारोहः च विशेषोत्साहेन सम्पद्येते । अत्र विशेषरूपेण आकर्षकः महोत्सवः भवति । बहुशः जनाः इमं समारोहं द्रष्टुं दिल्लीम् आगच्छन्ति ।

एतद् मम सौभाग्यं यत् अहम् अत्रैव जन्म अलेभे, अत्रैव च वर्धितः । अहम् अस्य सेवायै च आत्मानम् अर्पयिष्यामि ।

स्वतन्त्रतादिवस-समारोहः

अस्माकं देशे जनाः प्रतिवर्षं बहून् महोत्सवान् सोल्लासेन सम्पादयन्ति । केचित् उत्सवाः सामाजिकाः, केचित् धार्मिकाः, केचिच्च राष्ट्रीयाः भवन्ति । राष्ट्रीयोत्सवेषु स्वतंत्रता-दिवसस्य प्रमुखं स्थानं वर्तते ।

अस्माकं देशः भारतं बहुकालपर्यन्तं पराधीनता-पाशे बद्धमासीत् । आङ्गलीयाः अस्मासु भारतीयेषु अत्याचारान् कुर्वन्ति स्म, काष्ठपुत्तलिकाः इव अस्मान् नर्तयन्ति स्म । एतत् सर्वं दृष्ट्वा लोकमान्यो बालगंगाधर तिलकः, महात्मा गांधी, पंडित जवाहरलाल नेहरू तथा अन्ये बहवः नेतारः देशं स्वतन्त्रं कारयितुं सत्याग्रहान् आन्दोलनानि च अकुर्वन् । तैः कारागारयातना अपि भुक्ता । अनेके वीराः स्वान् प्राणान् जुहाव ।

"स्वतन्त्रता अस्माकं जन्मसिद्धः अधिकारः" इति श्री लोकमान्य बालगंगाधर तिलकः उच्चैः उद्घोषितवान् । एतेन विद्रोहाग्निना विवशाः भूत्वा आङ्गलीयाः भारतं स्वतन्त्रं कृत्वा स्वदेशम् अगच्छन् ।

अस्माकं देशः 1947 खीष्टाब्दे अगस्तमासस्य पञ्चदश-तारिकायां स्वतन्त्रो जातः । एष एव अस्माकं स्वतन्त्रता-दिवसः, भारतीयानां महत्त्वपूर्णं राष्ट्रीयं पर्वास्ति ।

अस्मिन् दिवसे सर्वत्र उत्सवाः भवन्ति । राजधान्यां अयमुत्सवः विशेषोत्साहेन सम्पद्यते । प्रातःकाले सप्तवादन-

समये रक्तदुर्गस्य लाहौरी द्वारसमीपस्थे प्राचीरे, अस्माकं देशस्य प्रधानमंत्री ध्वजारोहणं करोति । तत्र अनेके मंत्रिणः, नेतारः, राजदूताः अन्ये च विशिष्टातिथयः उपस्थिताः भवन्ति । ध्वजारोहणादनन्तरं राष्ट्रगानं गायन्ति । तदनन्तरं च प्रधानमंत्री सारगर्भितं भाषणं ददाति ।

विद्यालयेषु विशेषरूपेण अस्मिन् दिवसे उत्सवो भवति । प्रातःकाले शिक्षकाः छात्राश्च विद्यालयं गच्छन्ति । तत्र विद्यालयस्य प्रधानाचार्यः राष्ट्रध्वजं आरोहति । छात्राः अध्यापकाश्च ध्वजं प्रणमन्ति । राष्ट्रगीतं च गायन्ति । ततः प्रधानाचार्यः छात्रानुपदिशति । तदनन्तरं शिक्षकाः छात्रेभ्यः मिष्ठान्नं वितरन्ति ।

एवमेव अन्येषु अपि राज्येषु मुख्यमंत्रिणः अथवा राज्यपालाः राष्ट्रध्वजं आरोहन्ति । विदेशस्थितेषु अस्माकं राजदूतावासेषु च अयं उत्सवः हर्षेण उत्साहेन च सम्पद्यते ।

गणतन्त्रदिवस-समारोहः

अस्माकं देशे जनाः प्रतिवर्षं बहून् महोत्सवान् सोल्लासेन सम्पादयन्ति । केचित् उत्सवाः सामाजिकाः, केचित् धार्मिकाः, केचिच्च राष्ट्रीयाः भवन्ति । राष्ट्रीयोत्सवेषु स्वतन्त्रता दिवसस्य अनन्तरं गणतन्त्रदिवससमारोहस्य स्थानम् आगच्छति।

चिरकालिकायाः पराधीनताया अनन्तरं अस्माकं देशः 1947 तमेऽब्दे अगस्तमासस्य पञ्चदशतारिकायां स्वतन्त्रो जातः। परं भारतस्य विधाननिर्मात्री परिषद् यत् संविधानं निर्मितवती तत् 1950 खीष्टाब्दे जनवरी मासस्य षड्-विंशतितारिकायाः सञ्चारितम् अभवत्। तदैव भारतः पूर्णरूपेण स्वतन्त्रो जातः। अस्मिन् संविधाने भारतस्य प्रत्येकः पुरुषः धर्मकृतात्, जातिकृतात्, लिङ्गकृतात् वा भेदान्मुक्तः भवति। तस्मात् दिनात् आरभ्य प्रतिवर्षं भारतीयाः जनवरीमासस्य षड्विंशतितमायां तारिकायां गणतन्त्रदिवससमारोहः महता उल्लासेन सम्पादयन्ति।

अस्मिन् दिवसे भारतवर्षस्य सर्वे जनाः स्व-स्वनगरेषु महता उत्साहेन अयं उत्सवः मानयन्ति। भारतस्य राजधान्यां दिल्लीनगर्यां विशेषरूपेण आकर्षकः महोत्सवः भवति। बहुशः जनाः इमं समारोहं द्रष्टुं दिल्लीम् आगच्छन्ति। प्रातःकाले अस्माकं देशस्य प्रधानमंत्री ध्वजा-रोहणं करोति। ध्वजारोहणात् अनन्तरं राष्ट्रगानं गायन्ति। तत्पश्चात् भारतद्वारे अस्माकं प्रधानमंत्री आगच्छति।

प्रातः एव लक्षशो जनाः भारतद्वारे (इण्डियागेट) एकत्र भवन्ति। तत्र तेषां समक्षं राष्ट्रपति-भवनात् चतुर्भिरश्वैः आकृष्यमाणः रथः राष्ट्रपतिं नीत्वा समायाति। सहस्रघ्नीनां निर्घोषेण राष्ट्रपतेः अभिनन्दनं भवति। तदा जलसेना-वायुसेना-स्थलसेनानां सैनिका अपि राष्ट्रपतिम् अभिनन्दन्ति।

तदा आकाशात् वायुयानानि पुष्पाणि वर्षन्ति । तत्पश्चात् शोभायात्रा आरम्भं भवति । अश्वारोहाः, उष्ट्रारोहाः, गजारोहाः, पदातयः, नानाविधानि युद्धोपकरणानि वाहनानि च प्रयान्ति । अनेक राज्येभ्यः समायाताः पुरुषाः विद्यार्थिनश्च स्व-स्वसंस्कृत्यनुरूपं विरचितं शोभादृश्यं उपस्थापयन्ति । इयं शोभायात्रा भारत- द्वारात् आरभ्य बहुषु राजमार्गेषु शोभां दर्शयन्ती शोणदुर्गे समाप्तिं गच्छति । अनेन प्रकारेण अयं उत्सवः भारतीयाः उत्साहेन मानयन्ति ।

वसन्तर्तुः/वसन्त ऋतुः

भारतवर्षे एकस्मिन् वर्षे षट् ऋतवः भवन्ति । ते च वसन्त, ग्रीष्म, वर्षा, शरद्, हेमन्त, शिशिर इति सन्ति । द्वयोः द्वयोः मासयोः एकः ऋतुः भवति । तत्र चैत्रवैसाखौ वसन्तो भवति । सर्वेषु ऋतुषु वसन्तर्तुः सर्वोत्तमः अस्ति । अतएव ऋतुराजः कथ्यते ।

अयं ऋतुः अतीव रमणीयः भवति । वसन्तकाले प्रकृतिः नूतनं परिधानं धारयति । शिशिर ऋतौ सर्वेभ्यः वृक्षेभ्यः पत्राणि निपतन्ति । परन्तु यदा वसन्त ऋतुः आयाति तदा वृक्षे-वृक्षे नूतनानि पल्लवानि प्रस्फुटन्ति । सुरम्येषु वनेषु,

उपवनेषु, पर्वतेषु, च सर्वत्र लताः नवैः कुसुमैः भूषिताः भवन्ति । उद्यानेषु विविधानि पुष्पाणि विकसन्ति । आम्र-वृक्षेषु मञ्जर्यः प्रस्फुटन्ति । आम्रवाटिकासु कोकिलाः मधुरं कूजन्ति । खगाः दिशि दिशि धावन्ति, कूजन्ति, नृत्यन्ति च । भ्रमराः पुष्पेषु, मञ्जरीषु, प्रफुल्लितेषु कमलेषु च गुञ्जन्ति ।

कदाचिदेव कोऽपि कविः स्यात् यः वसन्तस्य ऋतोः वर्णनं स्वरचनासु न अकरोत् । कालिदासः स्वनाटके अभिज्ञान-शाकुन्तले स्वमहाकाव्ये कुमारसम्भवे च अस्य मनोहारि वर्णनम् अकरोत् ।

द्रुमाः सपुष्पाः सलिलं सपद्मम्,
स्त्रियः सकामाः पवनः सुगन्धिः ।
सुखाः प्रदोषाः दिवसाश्च रम्याः,
सर्वं प्रिये ! चारुतरं वसन्ते ॥

वसन्तर्तोः सर्वत्र इदृशी रमणीयता भवति, अतएव "ऋतुराजः" इति कथ्यते ।

अस्मिन् ऋतौ मलयानिलः मन्दं मन्दं वहति । सदा सर्वे जनाः अपूर्वमेव सुखम् अनुभवन्ति । कृषकाः नव शस्यानि दृष्ट्वा प्रसन्नाः भवन्ति । अस्मिन् काले न केवलं मानवाः अपितु समस्ताः प्राणिनः प्रसन्नाः भवन्ति ।

वसन्ते न अधिकं शीतं भवति न अधिकं उष्णं भवति । शीतलः, मन्दः सुगन्धिश्च वायुः वहति । अनेन कारणेन भ्रमणे महान् आनन्दः भवति । वसन्ते भ्रमणेन स्वास्थ्यलाभो

भवति । शरीरे नवीनं रक्तं सञ्चरति । "वसन्ते भ्रमणं पथ्यम्" इति साधूक्तम् ।

एतस्मादेव भगवता श्रीकृष्णेन गीतायां–"ऋतूणां कुसुमाकरः" इति उक्त्वा एतस्य महत्वं प्रतिपादितम् ।

वर्षा ऋतुः/वर्षर्तुः

भारतस्य ऋतुप्रधानदेशत्वात् सर्वे ऋतवः यथाकालं क्रमशः आगत्य देशस्य महान् उपकारं कुर्वन्ति । सर्वे षड् ऋतवः वसन्त, ग्रीष्म, वर्षा, शरद्, हेमन्त, शिशिर च भारतस्य शोभां एव संवर्धयन्ति। ऋतुषु तृतीयः ऋतुः वर्षा ऋतुः भवति । ग्रीष्मस्यानन्तरं वर्षायाः आगमनम् अतीव सुखप्रदं भवति । अयं ऋतुः अतीव शोभनः सर्वप्रियञ्च भवति ।

यदा निदाघस्य आतपेन धरा सन्तप्ता भवति, सर्वत्र शुष्काः वृक्षाः, दग्धाः लताः, जलहीनाः नद्यः दृश्यन्ते तदा आषाढस्य आरम्भे गगनं मेघाच्छन्नं जायते । सुखकरं वर्षागमनं च भवति ।

वर्षा ऋतौ प्रायेण सर्वदैव वृष्टिः भवति । आकाशं निरन्तरं मेघैः आच्छन्नं तिष्ठति । कदाचित् जलबिन्दवः पतन्ति । कदाचित् मेघाः वृथा गर्जन्ति । कदाचित् मुसलधारा

वृष्टिः भवति । घनानां मध्ये विद्युतः दीव्यन्ति । भूमिः प्रशान्तं भवति । वर्षान्ते आकाशे इन्द्रधनुषः राजते । नद्यः सरोवराः जलपूर्णाः भवन्ति ।

वर्षा ऋतोः दृश्यम् अतीव रमणीयं भवति । वनेषु, उपवनेषु च सर्वत्र हरीतिमा प्रसरति । शीतलाः समीराः प्रवहन्ति । कृषकाः अपि हृदयेन वर्षाम् अभिनन्दन्ति यतः क्षेत्रेषु अन्नादिकं वर्षाश्रितं एव । अस्मिन् समये कृषकाः भूमिं कर्षन्ति, क्षेत्रेषु बीजानि वपन्ति । कृषिप्रधानाय भारताय तु वर्षा वरदानम् अस्ति । सुवृष्टिः एव सुभिक्षम् आनयति ।

यदा वर्षा प्रारभते तदा बालकबालिकाः इतस्ततः कूर्दन्ति, नृत्यन्ति, कोलाहलं च कुर्वन्ति । ते कागदनौकाः रचयित्वा जले क्षिपन्ति । नराः नार्यश्च उल्लसिताः जायन्ते । युवतयः उपवनेषु वृक्षेषु दोलां निक्षिप्य आनन्देन दोलन्ते । मधुराणि गीतानि गायन्ति । आकाशे मेघान् दृष्ट्वा मयूरोऽपि मत्तो भूत्वा नृत्यति । जलाशयेषु मण्डूकाः रटन्ति ।

परम् अतिवृष्टिः हानिकरा । प्रबलवातेन सह यदा वर्षा भवति तदा वृक्षाः भूमौ पतन्ति । भवनानि क्षतिं लभन्ते । जलप्लावेन सहस्रशः ग्रामाः जले निमग्नाः भवन्ति । धनहानिः, पशुहानिः, जन विनाशः च भवति । यातायातेषु बाधा भवति । सामान्यं दैनिकं जीवनं सुखेन न सम्पद्यते । अतः महती वृष्टिरपि हानिकरा ।

ग्रीष्मर्तुः

अस्माकं देशे एकस्मिन् वर्षे षड् ऋतवः भवन्ति । ते च वसन्त, ग्रीष्म, वर्षा, शरद्, हेमन्त, शिशिर इति प्रसिद्धाः सन्ति । ऋतुषु द्वितीयः ऋतुः ग्रीष्मर्तुः भवति ।

प्रचण्डसूर्यः स्पृहणीयचन्द्रमाः,
सदावगाहक्षतवारि संचयः ।
दिनान्तरम्योऽभ्युपशान्तमन्मथोः
निदाघकालोऽयमुपागतः प्रिये ॥

वसन्तर्तोः उपरान्तं यदा भगवान् सूर्यः वृषभराशिं गच्छति तदा ग्रीष्मर्तुः आगच्छति। दिवाकरः प्रचण्डकिरणैः संसार तपयति । दिवसाः दीर्घाः रात्रयः च क्षीणाः जायन्ते । मध्याह्नकाले तु तीव्रः वातः अनलमिव वहति ।

नद्यः, सरोवराः च क्वचित् जलहीनाः क्वचित् च क्षीणतराः दृश्यन्ते । भूमौ तृणानि शुष्कानि भवन्ति । पक्षिणः स्वनीडेषु, पशवः वृक्षाणां छायायां, महिषाः च तडागेषु स्थित्वा ग्रीष्मकालं यथाकथञ्चित् यापयन्ति ।

दरिद्राः मध्यवर्गीयाः अपि च विद्युत् व्यजनैः ग्रीष्मस्य भयंकरं तापं यथासम्भवं वशीकुर्वन्ति । धनिकाः तु वातानुकूलितयन्त्रेण ग्रीष्मस्य तापं दूरीकृत्य सुखेन जीवन्ति । मध्याह्नकाले प्रायः जनाः स्वपन्ति ।

सर्वत्र ग्रीष्मतापः तु असह्यः । अत एव विद्यालयेषु मासद्वयस्य अवकाशः भवति । अवकाशे उद्योगिनः विद्यार्थिनः

तु अतिरिक्तम् अध्ययनं कृत्वा ज्ञानवृद्धिं कुर्वन्ति । बालिकाः युवतयः अपि गृहकार्यं, हस्तकलां, विभिन्नव्यञ्जनं च कृत्वा स्वज्ञानवृद्धिं कुर्वन्ति । परम् अलसाः तु दुर्व्यसनेन शयनेन च कालं वृथा नाशयन्ति ।

सायंकाले यदा सूर्यस्य तापः किञ्चित् क्षीणः भवति तदा सर्वे जनाः, बालाः स्वगृहात् बहिरागत्य उपवने भ्रमन्ति, क्रीडन्ति च । तडागे तरन्ति च । विविधाः शीतलाः पेयाः च पिबन्ति । इत्थं सर्वे जनाः यथाकथञ्चित् ग्रीष्मकालं यापयन्ति । शीतप्रधानेषु नगरेषु च जनाः ग्रीष्मर्तौ गच्छन्ति ।

दीपावली

अस्मिन् देशे प्रतिवर्षं हिन्दवः बहून् महोत्सवान् सम्पादयन्ति, तेषु विजयदशमी, दीपावली, होलिकोत्सवश्च प्रमुखाः एव । परन्तु दीपावल्यां जनानां हृदयेषु यादृशः उत्साहः जायते तादृशो न अन्योत्सवेषु । अयम् आर्याणां पवित्रतमः उत्सवः अस्ति ।

दीपानाम् आवल्यः (पंक्तयः) यस्मिन् पर्वणि प्रज्वाल्यन्ते तत् पर्वं दीपावली उच्यते । अयं उत्सवः कार्तिकमासस्य अमावस्यायां संपद्यते । उत्सवदिवसात् पूर्वमेव जनाः स्व-स्व गृहाणि आपणानि च मार्जयन्ति । केचन स्वगृहं मृत्तिकया

लेपयन्ति । भवनानि सुधया लेपयन्ति । अन्याभिः सज्जा-सामग्रीभिः च तानि सुसज्जयन्ति ।

कथ्यते यत् एतस्मिन् एव दिवसे श्रीरामः रावणं हत्वा स्वपत्नीं सीतां प्राप्य, सीतया लक्ष्मणेन च सह अयोध्यां प्रत्यागच्छत् । तदा प्रसन्नाः अयोध्यावासिनः तेषां स्वागताय दीपमालिकाभिः स्वानि गृहाणि सुसज्जितानि अकुर्वन् । तद् दिनात् आरभ्य भारतीयाः प्रतिवर्षं दीपावली उत्सवं महता आनन्देन उत्साहेन च मानयन्ति ।

दीपावल्याः दिन-द्वय-पूर्व-धन-त्रयोदश्यां तिथौ जनाः नवानि पात्राणि क्रीणन्ति । अग्रिमे दिवसे नरक चतुर्दश्यां नरकासुरघातकस्य विष्णोः पूजां कुर्वन्ति। दक्षिणभारतीयाः नरक चतुर्दश्यां नरकासुरस्यः वधं एव दीपावल्याः उत्सवस्य कारणं कथयन्ति । नरकासुरः विष्णुं एकं वरम् अयाचत् यत् सर्वे जनाः तस्य मरणं उल्लासेन मानयितव्यं इति । अतः तदा प्रभृति अद्यावधि दक्षिण भारतीयाः तद्दिने प्रातरुत्थाय तैलस्नानं कुर्वन्ति । नूतनवस्त्रं धारयन्ति । विष्णोः पूजां कुर्वन्ति । पूजनानन्तरं सर्वे मिलित्वा मिष्टान्नानि भक्षयन्ति । बालाः 'पटाका, फुलझड़ी' इत्यादिभिः अग्नि-क्रीडनकैः क्रीडन्ति, आनन्दं च अनुभवन्ति ।

अमावस्यायां एव दीपावल्याः मुख्यपर्वः भवति । एतस्मिन् अवसरे सायं समये दीपकानि प्रज्वालयन्ति । रात्रौ निज-निज गृहेषु जनाः देवीं भगवतीं लक्ष्मीं पूजयन्ति ।

व्यवसायिनश्च नव्यासु पञ्चिकासु देयमादेयम् आय-व्ययं च लिखन्ति ।

अयं उत्सवः अन्धकारस्योपरि प्रकाशस्य, असतः उपरि सतः विजयं स्मारयति ।

होलिकोत्सवः

अस्माकं देशे यथा दीपावली एकः उत्सवः अस्ति तथैव होलिका अपि एकः उत्सवः अस्ति । अयं वसन्तोत्सवः इत्यपि कथ्यते । अयं उत्सवः प्रतिवर्षं फाल्गुनमासस्य पूर्णिमायां भवति । अयं हासपरिहासस्य, आह्लादस्य, गानस्य, आनन्दस्य च उत्सवः अस्ति ।

अस्य उत्सवस्यारम्भः वसन्तपञ्चमीतः भवति । यत्र तत्र चतुष्पथे बालकाः काष्ठसञ्चयं कुर्वन्ति । पूर्णिमायाः पूर्वं चतुर्दश्याः रात्रौ होलिकादाहः भवति । सर्वे सम्मिल्य ज्वालयन्ति । होलिकायां जनाः काष्ठानि क्षिपन्ति, पक्व यवगोधूमादीन् भर्जयन्ति । प्रसादरूपेण गृहं नयन्ति च । ततः द्वितीयदिने प्रातः धूलिवन्दनं भवति । ततः जनाः परस्परं रंगप्रक्षेपणं कुर्वन्ति । बालाः, युवकाः, वृद्धाः, कन्याः, महिलाः च समवयस्कानां उपरि रक्तं, पीतं, हरितं, नीलं च बहुविधं

रंगं प्रक्षिपन्ति । सर्वे जनाः वैरादिकं विस्मृत्य परस्परं स्नेहेन मिलन्ति । परस्परं आलिंगयन्ति, मिष्टान्नानि च खादयन्ति ।

अस्य उत्सवस्य उत्पत्तिविषये एका कथा विद्यते । नास्तिकस्य हिरण्यकश्यपस्य होलिका नाम भगिनी आसीत् । सा एकदा वरदत्ता आसीत् यत् अग्निः तां न दाहयिष्यति । हिरण्यकश्यपस्य पुत्रः प्रह्लादः नारायणस्य परमभक्तः आसीत् । हिरण्यकश्यपः पुत्रं ईश्वरभक्तिं परित्यज्य तस्य भक्तिं कर्तुं बारम्बारं कथयति स्म । परं सः नामन्यत् । एकदा पिता पुत्रस्य हत्यायै प्रयत्नमकरोत् । हिरण्यकश्यपस्य भगिनी होलिका स्व भ्रातुः आदेशेन प्रह्लादम् अंके निधाय अग्नौ प्राविशत् येन प्रह्लादः नश्येत् । परं दैवमायया विपरीतमेव जातम् । होलिका तु दग्धा परन्तु प्रह्लादः सुस्वस्थः आसीत् । तस्मात् दिनात् आरभ्य भक्तप्रह्लादस्य रक्षोल्लासे इदं उत्सवम् आरभत ।

अयं महान् आनन्ददायकः उत्सवः अस्ति । अस्मिन् महोत्सवे जातिभेदं वर्णभेदं च विहाय जनाः परस्परं स्नेहेन मिलन्ति । इदमेव होलिकोत्सवस्य महत्त्वम् अस्ति ।

विजयदशमी

विश्वस्य सर्वेषु राष्ट्रेषु महोत्सवाः भवन्ति । महोत्सवैः जनतासु उल्लासः, उत्साहः, उमंगश्च उत्पद्यते । जनाः उत्सवैः नवजीवनं इव आप्नुवन्ति । भारतेऽपि बहवः महोत्सवाः जायन्ते, यैः समये समये प्रजाः जागृतिं नवोल्लासं च लभन्ते । तेषु पर्वसु विजयदशमी महोत्सवस्य अपि महत् गौरवम् अस्ति ।

विजयदशमी अस्माकं महानुत्सवः वर्तते । एष उत्सवः आश्विनमासस्य शुक्लपक्षस्य दशम्यां तिथौ सम्पद्यते । अस्मिन् दिने रामः परदारहर्तारं रावणं निहत्य स्वां धर्मपत्नीं प्राप्त्वा विजयम् अलभत् । अतः दिवसोऽयं 'विजयदशमी' इति कथ्यते ।

उत्सवात् पूर्वेषु दशदिवसेषु प्रतिस्थानं, प्रतिनगरं, प्रतिग्रामं रामलीलायाः प्रदर्शनं क्रियते । अस्मिन् दिने तु विशेषः आमोदप्रमोदः भवति । सर्वत्र मेलकं भवति । प्रतिनगरं रावणकुम्भकर्णमेघनादानां विशालाः प्रतिमाः निर्मीयन्ते । तेषु विस्फोटकपदार्थाः पूरिताः भवन्ति । यदा ते अग्निना प्रज्वाल्यन्ते तदा ते स्फुटिताः सर्वत्र महान्तं उद्घोषं कुर्वन्ति ।

बंगप्रान्ते अयमुत्सवः 'दुर्गा-पूजा' नाम्ना प्रख्यातः अस्ति । दुर्गा महिषासुरस्य, शुम्भ-निशुम्भयोश्च मर्दिनी कथ्यते, सा हि देवी दुष्ट-संहारिणी भक्तानां भयहारिणी चास्ति ।

नवरात्रेषु समस्ते भारते तस्याः पूजनं भवति । परं बंगदेशे एषा पूजा परमश्रद्धया उत्सवरूपेण च भवति । तत्र नव दिवसात् यावत् 'पूजा' समारोहः भवति । दशम्यां तिथौ दुर्गा कैलाशं गच्छति । अतः भक्ताः तस्याः प्रतिमां नद्यां विसर्जयन्ति ।

दक्षिणभारते नवरात्रे नवदिनपर्यन्तं दुर्गालक्ष्मीसरस्वत्याः पूजा भवति । प्रथम त्रयदिनं दुर्गायाः पूजा भवति । तदनन्तरं त्रयदिनपर्यन्तं लक्ष्म्याः पूजा भवति । ततः त्रयदिनपर्यन्तं सरस्वत्याः पूजा भवति । नवरात्रस्य अन्ते विजयदशमी दिने दुर्गालक्ष्मीसरस्वत्याः पूजां कृत्वा सर्वे जनाः किञ्चित् पठन्ति, गायन्ति, वाद्यानि वादयन्ति च । जनाः बालान् अक्षराभ्यासं कारयित्वा पाठशालायां प्रेषयन्ति । तद्दिने शस्त्रपूजां च कुर्वन्ति । प्राचीनकाले एतस्मादेव दिवसात् क्षत्रियाः विजय-यात्राम् आरम्भं कुर्वन्ति स्म। अतएव एतस्मिन् दिने शस्त्रपूजा विधीयते । शंस्त्रपूजनं क्षात्र-धर्मस्य महत्त्वं प्रतिपादयति ।

शक्तेः अधिष्ठात्री देवी दुर्गा अस्ति, सम्पत्तेः अधिष्ठात्री देवी लक्ष्मीः अस्ति, ज्ञानस्य अधिष्ठात्री देवी सरस्वती अस्ति । एवं विजयदशमी शक्तिपर्वमपि अस्ति ।

कोऽपि महापुरुषः

महात्मा गाँधी

को न जानाति प्रातःस्मरणीयस्य महात्मनो गान्धिनो नाम । महात्मा गाँधी विश्ववन्द्यः महापुरुषः आसीत् । महात्मा गान्धी अस्माकं राष्ट्रपिता आसीत् । सः सर्वान् भारतीयान् स्वपुत्रानिव अमन्यत् । तस्मात् कारणात् एव सः राष्ट्रपिता इत्युपाधिना अलंकृतः ।

अस्य जन्म 1869 तमे ईश्वीयाऽब्दे गुजरातप्रदेशस्य पोरबन्दरनामके स्थाने अक्तूबरमासस्य द्वितीय तारिकायामभवत् । अस्य नाम मोहनदास कर्मचन्द गान्धी आसीत् । अस्य पिता श्री कर्मचन्द गान्धी, माता च श्रीमती पुतलीबाई आसीत् । अस्य धर्मपत्न्यः नाम कस्तूरबा आसीत् ।

सः बाल्यकालादेव विवेकशीलः, मितभाषी, सत्यनिष्ठः, अहिंसावादी, ईश्वरभक्तश्च आसीत् । पितरि, मातरि, गुरौ चाऽस्य महती निष्ठा आसीत् । सत्यम्, अहिंसा, लोकसेवा च रत्नत्रयमस्य जीवनस्य प्रधानमुद्देश्यमासीत् । एतत्त्रयस्य उपासनयैव सः विश्ववन्दनीयो जातः ।

राजकोट राज्ये अस्य पिता दीवान् पदस्थः आसीत् । मोहनदासस्य प्रारम्भिका शिक्षा तत्रैव जाता । हाईस्कूल इति परीक्षामुत्तीर्य सः उच्चशिक्षायै इंग्लैण्डमगच्छत् । गमनात् पूर्वं सः मातुरादेशप्राप्त्यर्थं प्रतिज्ञात्रयमकरोत्, "नाहं कदापि मदिरां सेविष्ये, नाहं मांसं स्प्रक्ष्यामि, पूर्णरूपेण ब्रह्मचर्यव्रतं

पालयिष्यामि" इति । एषा प्रतिज्ञा तेन स्वप्नेऽपि न उल्लंघिता ।

ततो निवर्त्य राजकोटराज्ये वाक्कील कार्यं प्रारब्धवान् । कस्यचित् अभियोगस्य प्रयोजनेनैव स दक्षिण-अफ्रिकाम् अगच्छत् । तत्र भारतीयानां महान्तमनादरं दृष्ट्वा सर्वान् आहूय सत्याग्रहान्दोलनं चालितवान् । अनेन प्रकारेण अनादरात् मुक्तिः जाता ।

तत्र तस्य उपायस्य साफल्यम् अनुभूय स्वदेशोद्धाराय अपि तस्य प्रयोगं कर्त्तुं सः स्वदेशं प्रत्यागच्छत् । भारते स्वातन्त्र्यप्राप्त्यर्थं सत्याग्रहान्दोलनं चालितवान् । सर्वप्रथमं सः चम्पारणकृषकाणां दुःखनिवारणाय सत्याग्रहम् अकोरत् । तदा जलियाँवाला बाग नामके स्थाने आंग्लैः कृतम् अत्याचारं प्रति न्यायप्राप्त्यर्थं संपूर्णे भारते आन्दोलनम् अकरोत् । केवलं सत्याहिंसास्त्रेणैव विना रक्तपातेन भारतदेशं स्वतन्त्रमकारयत् ।

स्वदेशवस्तूनां प्रचारः, मादकवस्तूनां बहिष्कारः, हरिजनानां उद्धारः, ग्रामोद्योगानां समुज्जीवनम्, राष्ट्रभाषायाः प्रसारः, भारतीयसंस्कृतेः पुनरुद्धारश्च स अकरोत् ।

इत्थं सः सर्वं जीवनं निःस्पृहः भूत्वा मानवहिताय, देशहिताय, जगत् हिताय च अर्पयत् । सः मम प्रेरणास्रोतः आदर्शः पूज्यः च । इदानीं तस्य पार्थिवशरीरं नास्ति परन्तु सः यशःशरीरेण जीवति । सत्यमुक्तम् :—

परोपकारैकधियः स्वसुखाय गतस्पृहाः ।
जगद्धिताय जायन्ते मानवाः केऽपि भूतले ॥

महामना मदनमोहन मालवीयः

भारतीयेषु महापुरुषेषु पं. मदनमोहन मालवीयस्य प्रमुखं स्थानमस्ति । श्री मदनमोहनमालवीयस्य जन्म 1861 तमे खीष्टाब्दे दिसम्बरमासस्य पंचविंशतितिथौ प्रयागनगरे अभवत् । तस्य पूर्वजाः "मालवा" इति प्रदेशस्य मूलवासिनः आसन् । अतः स मालवीयः ब्राह्मणः अकथयत् । तस्य माता मूनादेवी आसीत् । पिता पं. व्रजनाथव्यासः च ईश्वरस्य परमभक्तः संस्कृतज्ञः चासीत् । सः स्ववैदुष्येन प्रसिद्धः अभवत् । अतः काशीदरभङ्गानगरयोः राजानौ अस्य अतीव सम्मानमकुरुताम् ।

पं. मदनमोहनमालवीयस्य प्राथमिकं शिक्षणं गृहे एव आरभत् । बाल्ये मदनमोहनः संस्कृतपाठशालायाम् अपठत् । प्राथमिकमध्ययनं समाप्य प्रयाग जनपदस्य राजकीय इण्टर-कालेजे प्रवेशमलभत् । ततश्च प्रयागविश्वविद्यालयात् बी.ए. परीक्षामुत्तीर्य अध्यापकः अभवत् । पुनः शिक्षणकार्यं विहाय प्राड्विवाक् (वकील) भूत्वा प्रयागस्य उच्चन्यायालये प्राड्-विवाक् कर्मं कर्तुमारभत् । सः महान् सम्पादकः, वक्ता, देशभक्तः चाभवत् । सः सितारवादकः गायकः चापि आसीत् ।

सः नित्यं सूरमीरगीतान् मधुरकण्ठेन अगायत् । सः कुशलः अभिनेता आसीत् । प्रयागस्य "आर्य नाटकमंडल्यां" सः शकुन्तलायाः पोर्शियोनायिकायाः च अभिनयमकरोत् ।

तस्य गुरुः संस्कृताध्यापकः पं. आदित्यनारायणः आसीत् यस्य नेतृत्वे सः "हिन्दूसमाजम्" अस्थापयत् । 1887 तमे वर्षे सः "हिन्दुस्तान" पत्रिकायाः सम्पादनमकरोत् । हिन्दुस्तान समाचारपत्रस्य सम्पादनं कृत्वा हिन्दीभाषायाः परिमार्जन-प्रसारं चाकरोत् ।

भारतीयसंस्कृतेः रक्षार्थं वाराणस्यां 1916 तमे वर्षे फरवरीमासस्य चतुर्थतारिकायां हिन्दू-विश्वविद्यालयस्य स्थापनामकरोत् । एषः अस्याः संस्थायाः कुलपतिः अपि अभवत् । सर्वं जीवनम् अस्य उन्नत्यै अर्पणमकरोत् । हिन्दू विश्वविद्यालयः अस्य महोदयस्य समाजसेवायाः यशः अद्यापि प्रतीकरूपेण गायति ।

सः कांग्रेससंस्थायां प्रविश्य देशसेवायां तत्परः जातः । अयं अखिल भारतीय कांग्रेससभायाः सभापति पदमपि अलंचकार । महात्मा गांधी तं स्वज्येष्ठ भ्रातृतुल्यं अमन्यत् । सः प्रायः अकथयत् :—"क्षणं ज्वलितं श्रेयं न च धूमायितं चिरम्" । तंस्य निजजीवनं इति ज्वलितमेव आसीत् ।

अयं उज्ज्वलचरित्रः, मृदुभाषी, सत्यवक्ता, भारतीय-सभ्यतायाः परमभक्तः, हिन्दूधर्मरक्षकः असीत् । देशसेवा-व्रतरतः अयं महानुभावः 1946 तमे वर्षे नवम्बरमासस्य

द्वादशतारिकायां पार्थिवशरीरम् अत्यजत् । अद्यापि श्रद्धावन्तः भारतीयाः महामना मालवीयमहोदयस्य जीवनात् प्रेरणां गृह्णन्ति ।

"सः जातः येन जातेन देशो याति समुन्नतिम् " ।

श्री लोकमान्यः तिलकः

"स्वराज्यम् अस्माकं जन्मसिद्धोऽधिकारः" लोकमान्यस्य तिलकस्य इदं प्रसिद्धं कथनं कः न बोधति । समस्तेऽपि देशे तस्य असाधारणः सम्मानः प्रभावः च अस्ति ।

अस्य जन्म जुलाईमासस्य त्रिविंशतिः तारिकायां 1856 तमे वर्षे महाराष्ट्रस्य रत्नगिरि नामके स्थाने अभवत् । अस्य पिता गंगाधरः संस्कृतस्य महान् विद्वान् आसीत् ।

श्री बालगंगाधरतिलकः अत्यन्तः कुशाग्रबुद्धिः, सेवाभावनायुक्तः, त्यागनिष्ठावान्, तीव्रस्मरणशक्तिवान्, दृढसंकल्पः चासीत् । सः बाल्यकाले संपूर्णां गीतां कंठस्थम् अकरोत् । "कर्मण्येवाधिकारस्ते मा फलेषु कदाचन" इमं गीतायाः प्रमुखं संदेशं सः आजीवनम् अपालयत् ।

श्रीबालगंगाधरतिलकः प्राड्विवाक् (वकील) शिक्षामलभत्, परं स आंग्लशासनस्य वृत्तिं न स्वीकृतवान् । मित्रैः सह मिलित्वा सः एकं विद्यालयं, महाविद्यालयं च आरभत् ।

यत्र अशिक्षितभारतीयेभ्यः शिक्षा दीयते स्म । सः साप्ताहिक-पत्रिकाद्वयमपि प्रारभत्—मराठीभाषायां 'केसरी' आंग्लभाषायां च 'मराठा' इति । 1897 तमे वर्षे यदा महाराष्ट्रः प्लेगरोगेण दुर्भिक्षेण च ग्रस्तः अभवत् तदा सः जनतां स्वभाषणैः लेखैः च प्रोत्साहितवान् । विदेशीयवस्तूनां बहिष्काराय स्वदेशीयवस्तूनां च प्रचाराय आन्दोलनमकरोत् । तदा सः आंग्लशासनेन राजद्रोहस्य अपराधेन षड्वर्षैः बर्मास्थितमांडलेकारागारे क्षिप्तः । तत्र सः "गीतारहस्यम्" नामकं एकं विशालं पुस्तकम् अरचयत् ।

कारागारात् बहिरागत्य सः पुनः स्वराज्यम् अयाचत्, येन सः पुनः बन्दीकृतः । स्वराज्यप्राप्तेः वार्त्तां कर्त्तुं सः भारतीय-प्रतिनिधिरूपेण इंगलैंडम् अपि अगच्छत् । तत्रापि स्वभाषणैः सः जनान् प्रभावितवान् ।

तस्यः यशः न केवलं भारते अपितु समस्तसंसारे प्रसिद्धम् । जनैः सः "लोकमान्यः" अनया उपाधिना अलंकृतः । अगस्त-मासस्य प्रथमतारिकायां 1920 शताब्द्यां मुम्बईप्रान्ते सः महान् स्वतन्त्रता योद्धा दिवं गतः । अद्यापि सः यशः शरीरेण जीवति एव ।

स्मरणीयं भ्रमणम्

दिल्लीनगरस्य दर्शनीयस्थलेषु जन्तुशाला अपि एकं दर्शनीयं स्थानं वर्तते । एषा प्राचीनदुर्गात् पूर्वस्यां दिशि स्थिता अस्ति ।

गतरविवासरे अहं स्वमित्रैः सह तत्र भ्रमणार्थम् अगच्छम् । मुख्यद्वारात् बहिः एकः प्रवेशपत्रगृहं वर्तते । जनाः तत्र पंक्तिबद्धाः स्थिताः आसन् । अहमपि तत्र स्थित्वा सप्तप्रवेश-पत्राणि क्रीत्वा मित्रैः सह अन्तः प्राविशम् ।

तत्र विविधाः विहगाः सन्ति । मयूराः, हंसाः, शुकाः, चटकाः, कुक्कुटाः च सन्ति । केचित् विदेशीय खगाः अपि सन्ति ।

अनेके मांसभक्षकाः हिंसकाः जीवाः अपि सन्ति । अत्र वयं केसरिणः, चित्रकान्, शार्दूलान्, व्याघ्रान्, भल्लूकान् अपि अपश्याम । एते जीवाः दृढेषु विशाललौहगृहेषु सन्ति ।

तत्र केचित् शस्यभक्षकाः पशवः यथा मृगाः, वनगर्दभाः, गजाः, पारसीकाः काम्बोजाः विविधाः तुरगाः सन्ति । एतेषां निवासाय तत्र स्वभावानुकूलं वातावरणं निर्मितम् अस्ति ।

तत्र वयं दीर्घपुच्छान् वानरान् ह्रस्वपुच्छान् वानरान्, कृष्णमुखान् वानरान्, रक्तमुखान् वानरान् अपि अपश्याम । वनमानुषस्य चेष्टा दृष्ट्वा सर्वेषां भृशं मनोरंजनम् अभवत् ।

लघुस्थूलकायाः हरित-पीत-कृष्णाः सर्पाः अत्र दर्शकानां हृदये विस्मयं उत्पादयन्ति ।

मध्याह्नकाले तत्रैव अस्माभिः गृहात् नीतं भोजनमपि भक्षितम् । इत्थं सर्वेषां पशूनां पक्षीणां देशीयानां विदेशीयानाम् अपि विषये ज्ञानं प्राप्य, स्वमनोरंजनं च कृत्वा, वयं भृशं श्रान्ताः, सायं पंचवादनकाले गृहं प्रत्यागच्छाम ।

इदं मम जीवनस्य एकं स्मरणीयं भ्रमणम् आसीत् ।

दूरदर्शनस्य लाभाः

आधुनिकविज्ञानयुगे दूरदर्शनं एकम् आश्चर्यजनकम् आविष्कारमस्ति । अस्माकं देशे अस्य आगमनं किञ्चिद् विलम्बेनाभवत् । परं शनैः-शनैः अस्य प्रचारः वर्धते । इदानीं भारतस्य प्रमुखेषु नगरेषु दूरदर्शनकेन्द्राणि स्थापितानि । उपग्रहस्य साहाय्येन कृत्स्नेऽपि भारते दूरदर्शनस्य प्रवर्तनं भवति । यथा रेडियो इति उपकरणेन वयं दूरस्थितं शब्दं श्रृणुमः तथैव वयं दूरदर्शनेन दूरस्थितं दृश्यं पश्यामः शब्दं चापि श्रृणुमः ।

दूरदर्शनस्य अनेके लाभाः सन्ति। तेषु मनोरंजनं प्रमुखमस्ति । अनेके नाटकाः, नृत्य-संगीत-गीतादि कार्यक्रमाः दूरदर्शनेन प्रसारिताः भवन्ति । तेषां दर्शनेन श्रवणेन च वयं श्रान्तिं क्लान्तिं च विस्मृत्य सुखमनुभवामः । प्रतिसप्ताहं राष्ट्रभाषायां प्रान्तीयासु भाषासु च चलचित्राणि प्रदर्शितानि

भवन्ति।चलचित्राधारितः "चित्रहार" नामकः कार्यक्रमः अतीव लोकप्रियः अस्ति । प्रतिष्ठितैः व्यापारिकैः संस्थानैः अनेकानि प्रायोजितानि कार्यक्रमाणि अपि प्रस्तूयन्ते । तेषां माध्यमेन ते स्व-स्व उत्पादनानां विज्ञापनं कुर्वन्ति । एतत्सर्वं एकान्ते स्वेच्छानुसारं गृहे सुखासीनाः एव वयं द्रष्टुं शक्नुमः ।

दूरदर्शनस्य माध्यमेन वयं दविष्ठान् नेदिष्ठान् च समाचारान् तत्क्षणमेव पश्यामः श्रुणुमः च । एवम् अस्माकं ज्ञाने वृद्धिः भवति ।

दूरदर्शनेन सम्पाद्यमानानां विषयाणां यथादृष्टं विवरणं तत्कालं प्रसार्यते । राष्ट्रीय-दिवस-समारोहाणां, राजनीतिक-धार्मिक-सम्मेलनानां प्रसारणं दूरदर्शने समकालमेव भवति ।

राष्ट्रीयपर्वसु जनाः सम्मर्दं परित्यज्य गृहे सुखासीनाः सर्वं कार्यक्रमं, ध्वजारोहणं, शोभायात्रादिकं द्रष्टुं इच्छन्ति । आवागमनस्य असुविधाः विचिन्त्य बहुधा बालाः अपि बहिः अगत्वा गृहे एव दूरदर्शनेन सर्वं वीक्ष्य प्रसन्नचित्ताः भवन्ति । विदेशेषु अपि क्रीडमानाः क्रिकेटादिक्रीड़ाः स्वप्रकोष्ठे स्थित्वा पुरतः विलोक्य जनाः अमन्दमानन्दम् अनुभवन्ति ।

शिक्षायाः प्रसारमपि दूरदर्शनेन क्रियते । विशेषरूपेण गणितविज्ञानांग्लभाषातुल्यविषयेषु प्रमुखपाठान् प्रस्तुतीकृत्य दूरदर्शनविभागः छात्राणां महत् उपकारं करोति ।

कदाचित् बन्दीगृहात् पलायितानाम् अपराधीनां विषयेऽपि जनाः सूच्यन्ते ।

एवं दूरदर्शनस्य अनेके लाभाः सन्ति ।

विज्ञानस्य चमत्काराः

आवश्यकता आविष्काराणां जननी भवति । इदं युगं विज्ञानप्रधानं नास्त्यत्र कोऽपि संदेहः । तत्र विचार्यते किमिदं विज्ञानं नाम । कस्यचिदपि पदार्थस्य तत्वेन परिचयः नाम ज्ञानम् । परं वैशिष्ट्येन ज्ञानं विज्ञानम् । अर्थात् कस्यचित् पदार्थस्य महतां गुणानाम् अन्वेषणं कृत्वा तस्य शक्तेः प्रयोगः नाम विज्ञानम् ।

अद्यत्वे विश्वस्य प्रत्येकं क्षेत्रं विज्ञानेन प्रभावितं दृश्यते । वैज्ञानिकैः आविष्कारैः महानुपकारो जातः । सर्वतोऽधिकं विद्युच्चमत्कारैः अस्माकं जीवनं सुखपूर्णं जातम् ।

विद्युता प्रकाशः भवति । ग्रीष्मस्य भयंकरो तापः विद्युत्-व्यजनैः वशं भवति । वातानुकूलितयन्त्रेण समस्तेऽपि वर्षे वयं सुखम् अनुभवामः । हीटर-फ्रिजादीनि यन्त्राणि विद्युता एव चलन्ति । दूरभाषयन्त्रमपि विद्युत्प्रभावेण दूरस्थैः सह वार्तालापं कारयति ।

आकाशवाणी यन्त्रेण गीतं समाचारं च जनाः गृहस्थिताः एव श्रृण्वन्ति । दूरदर्शनेन दविष्ठामपि दृश्यमवलोकयामः । चलचित्रेण मनोरंजनं ज्ञानवर्धनं च कुर्मः ।

अद्य मुद्रणयन्त्रप्रभावेण अतिदुर्लभम् अपि ग्रन्थरत्नमल्पमूल्येन लब्धुं शक्यते ।

समाचारपत्राणि च गृहे-गृहे पठ्यन्ते । नानाविध पत्रिकाणि अपि सरलतया लभन्ते ।

यन्त्राणामाविष्कारेण कृषि जगति महती प्रगतिः दृश्यते । विद्युच्छक्तिप्रयोगेण प्रत्येकमपि कार्यं सरलतया कर्तुं शक्यते ।

नानाविधानि अद्‌भुतानि यानानि वैज्ञानिकैः निर्मितानि सन्ति । धूमयानेन (वाष्पयानेन) दूरस्थलेऽपि वयं वेगेन गच्छामः, पोतेन समुद्रांश्च तरामः । वायुयानेन आकाशेऽपि स्वच्छंन्दं विचरामः ।

चिकित्साविज्ञानेऽपि अभूतपूर्वमपि साफल्यं दरीदृश्यते । एक्स-किरण-साहाय्येन शरीरस्यान्तर्गतं रोगज्ञानं भवति ।

विज्ञानबलेनैव 'राकेट' इति यन्त्रेण तु जनाः चन्द्रलोकमपि गताः इत्यहो आधुनिक विज्ञानस्य विस्मयावहा गरिमा ।

परं विज्ञानेन नूतनाः भुशुण्ड्यः, शतघ्नयः, परमाणु विस्फोटकाः च निर्मिताः। एतानि अस्त्र-शस्त्राणि विनाशकानि । विज्ञानस्यापि सदुपयोगः दुरुपयोगः वा मानवाश्रितः । एतत् तु अस्माकं कर्त्तव्यम् यत् विज्ञानं मानवहिताय एव नियोजयेत न तु मानवविनाशाय ।

रूप्यकस्य आत्मकथा

मम नाम 'रूप्यकम्' अस्ति । रूप्यं रजतस्य अपरं नाम । पुरा रजतेन (रूप्येण वा) निर्माणकारणात् मम नामापि रूप्यकं जातम् । अद्यत्वे तु मयि रजतं न भवति, केवलम् अन्येषां धातूनां मिश्रणेन मम निष्पत्तिः भवति ।

मम जन्म कस्यचिद् कर्मकारस्य हस्तेन एव अभवत् । मम शरीरस्य मूलतत्वं धातुः पृथिव्याः गर्भात् कश्चित् कर्मकारः एव निष्कासितवान् । कर्मकाराः अनेकान् धातून् अग्नौ तप्त्वा द्रावयन्ति, तत्पश्चात् घटकयन्त्रे (टकसाले) प्रक्षिप्य मह्यं मूर्तरूपं प्रयच्छन्ति । मयि शरीरे भारतस्य राजकीयचिह्नानि अंकितानि । अपर पार्श्वे मम जीवनतिथिः अपि अंकिता । इत्थम् अग्नौ तप्त्वा, घनादिभिः मुद्गरैश्च ताडितः यदा अहं भवतां समक्षम् आगच्छामि तदा मम सुन्दराकृत्या सर्वे मुह्यन्ति, मां च आत्मसात् कर्तुं वाञ्छन्ति ।

यद्यपि अहं निर्जीवः सर्वथा जडोऽस्मि तदापि अहं संसारस्य सर्वाणि कार्याणि साधयितुं शक्नोमि । ममोपयोगितां ज्ञात्वा बुद्धिमन्तः माम् अर्जित्वा सुरक्षितं कुर्वन्ति, आवश्यकतानुसारं मम व्ययं कुर्वन्ति । इदं मम दुर्भाग्यमासीत् यत् कश्चिदपि मां उन्मुक्तवातावरणे स्वच्छन्दविचरणं कर्तुं न प्रयच्छति । सर्वैः अहं गुप्तरूपेण अन्तः स्थापितम् । चौरेण अपि तमसि एव चोरितम् । एवं मम जीवनं निरन्तरम् अन्धकारमयं परतन्त्रं चैव अभवत् ।

अस्मिन् क्षणे अहं एकस्य कर्मकारस्य स्वेदस्निग्धे हस्ते तिष्ठामि । कर्मकारस्य श्रान्तां दशां दृष्ट्वा अहं द्रवितम् अस्मि । अद्य अहं भृशं सुखमनुभवामि यत् एकस्य एतादृशस्य कर्मकारस्य हस्ते आगतमस्मि यः मया स्वक्षुधा-पीडितपरिवारस्य उदरपूर्तिं कृत्वा सुखं शान्तिं च लप्स्यते । एवं यदा कदा परोपकाराय स्वजीवनम् अर्पयित्वा अहं यशोपात्रं भविष्यामि ।

मम रूप्यकस्य कर्गलप्रतिनिधयः अपि एकरूप्यकम्, द्विरूप्यकम्, पञ्चरूप्यकम्, दशरूप्यकम्, विंशतिरूप्यकम्, पंचाशत्रूप्यकम् शतरूप्यकं चैतानि सन्ति ।

मम महत्त्वाकांक्षा

आकांक्षा नाम उत्कटा इच्छा । छात्रः स्वस्मिन् अध्ययन-काले श्रेष्ठाध्यापकेभ्यः मातापितृभ्यां च यत्-यत् शिक्षते तदनुसारं स स्वबुद्धौ विचारान् दृढ़ीकरोति । बाल्यकालादेव स्वमनसि गुरुप्राप्तान् उच्चविचारान् धारयति तदाश्रयेणैव स एकदा महान् पुरुषः भवति । विभिन्नपुरुषाणां विभिन्नाः एव आकांक्षाः सन्ति ।

अहं न तु पूंजीपतिवत् धनाढ्यः, न च कश्चित् महान् नेता भवितुं इच्छामि । मम तु उत्कटा इच्छा एका एव यत् अहं एकः कुशलः योग्यः च अध्यापकः भवेयम् ।

सर्वेष्वपि व्यवसायेषु मह्यम् अध्यापनकार्यम् अधिकं रोचते । इदं व्यवसायं पवित्रतमम् अस्ति ।

अध्यापकाः राष्ट्रस्य नियन्तारः चरित्रनिर्माणकाः च । ते विद्याधनं दत्वा, अज्ञानात् छात्रं बहिः निष्कासयन्ति । ते चरित्ररक्षकाः मार्गदर्शकाः च । 'आचार्यदेवो भव' इति कथितम् । अतः अहम् अध्यापकः भवितुं इच्छामि ।

अहं छात्रान् स्नेहेन अध्यापयिष्यामि । तेषां चरित्रनिर्माणे विशेष सहयोगं दास्यामि । मम छात्राः विनम्राः, स्नेहशीलाः, मधुरभाषिणः, आचारयुक्ताः च भविष्यन्ति । अहं तेषां मनोवैज्ञानिकरूपेण अध्ययनं कृत्वा तेषां समस्यानां समाधानं करिष्यामि । दण्डप्रयोगः कदापि न करिष्यामि । दरिद्र-विद्यार्थिभ्यः पुस्तकादीन् दत्त्वा सहायतां करिष्यामि । स्नेहेन तेषाम् अरुचिकारणं ज्ञात्वा तस्य प्रतीकारं करिष्यामि ।

यदि मयि काश्चित् न्यूनताः अवगुणाः वा भविष्यन्ति तेषां निवारणं कृत्वा एकः आदर्शः शिक्षकः भूत्वा 'छात्राणां हृदयेषु अमरं स्थानं ग्रहीष्यामि । एषा एव मम जीवनस्य महत्त्वाकांक्षा । अस्याः पूर्त्यै ईश्वरम् अहं प्रार्थये ।

कृषकः

सर्वेऽपि प्राणिनः वायुना, जलेन, अन्नेन च जीवन्ति । सर्वत्र वायुः वाति, जलं च उपलभ्यते । अतस्तयोः प्राप्तिः अनायासेन, अल्पायासेन वा भवति । परन्तु अन्नं उद्यमेनैव प्राप्यते । अन्नार्थं धान्यादिकं ये उत्पादयन्ति, ते "कृषकाः" इति कथ्यन्ते । अथवा ये कृषिं कुर्वन्ति ते कृषकाः कथ्यन्ते ।

अस्माकं देशः कृषिप्रधानः देशः अस्ति । अत्र कृषकाणां संख्या अधिका वर्तते । कृषकाः कृषिं कृत्वा जीवनोपयोगीनि अनेकानि वस्तूनि उत्पादयन्ति । तैः एव वस्तुभिः सर्वे जनाः जीवन्ति । अतः समाजस्य जीवनं धारणं च कृषकाणां उपरि निर्भरं वर्तते ।

कृषिः महता परिश्रमेण भवति । अतएव कृषकाणां दिनचर्या अतीव कठोरा श्रममयी च भवति । तेषां जीवने विश्रामाय मनोरंजनाय वा अति अल्पः समयः एव भवति । कृषकाः प्रातःकालात् आरभ्य सायंकालपर्यन्तं कठोरं परिश्रमं कुर्वन्ति । रात्रौ अपि ते पूर्णरूपेण विश्रामाय शयनाय वा समयं न लभन्ते ।

कृषकाणां कार्याणि ऋतोः अनुसारं भिन्न-भिन्नानि भवन्ति । कृषकाः क्षेत्राणि हलैः कर्षन्ति । तेषु बीजानि च वपन्ति । प्ररूढानि शस्यानि, अनावश्यकानि घासादीनि उत्खात्य संवर्धयन्ति । कदाचित् तानि जलेन सिञ्चन्ति । रात्रौ तानि रक्षन्ति । एवं बहुभिः प्रकारैः शस्यानि अनुपालयन्तः कृषकाः

धान्यकणेषु पक्वेषु तानि कर्तयन्ति । तान् अमलीकृत्वा तेभ्यः धान्यकणांश्च गृह्णन्ति । अनन्तरं विशुद्धं धान्यं गृहम् आनयन्ति ।

कृषकः प्रतिदिनं प्रातः बलीवर्दैः सह क्षेत्रं गच्छति । तत्र बहुविधानि कर्माणि करोति । मध्याह्नकाले अनेके कृषकाः क्षेत्रेषु एव भोजनं कुर्वन्ति । ततः पुनः कार्यं कुर्वन्ति । सायं गृहम् आगच्छन्ति । कृषकः रात्रिभोजनं कृत्वा कुटुम्बिभिः सह विविधान् वार्तालापान् करोति । ततः श्रान्तः गाढं स्वपिति ।

कृषकः धान्यानुत्पाद्य अस्माकं बहु उपकरोति । वर्षासु, आतपे, शैत्ये च बहुविधानि कष्टान्यविगणय्य सर्वेषां प्राणिनां जीवनाय परमम् आवश्यकं धान्यं उत्पादयति । अतः सः जगत्पिता इति यदि उच्चेत तर्हि उचितमेव भवति ।

आम्नाय-प्रकाशालय,
बरनागिर, करौंदी
वाराणसी-5

आम्नाय-ग्रन्थालय,
रत्ननिधि, मरौंदा

आम्नाय
भरतनिधि, क